सन्धानम्

(काव्य-सङ्ग्रहः)

R/1 007

राधावल्लभः

राधावल्लभ त्रिपाठी

प्रथमं संस्करणम् : १९८९

ISBN—81—85385—00—9

मूल्यम् : २५ रुप्यकाणि

मुद्रक : एकेडमी प्रेस
दारागंज, इलाहाबाद

Sandhanam : Collection of Sanskrit poems by Radhavallabh.

Published by Sanskrit Parishad
University, Sagar.

First Edn., 1989

Price : Rs. 25/-

राधावल्लभ त्रिपाठी

समर्पणम्

सन्धानमिदं पितृचरणेभ्यः

श्रीमद् डॉ० गोकुलप्रसाद त्रिपाठिभ्यः

सादरं समर्प्यते ।

राधावल्लभः

ज्ञप्तिः

शुष्कं सरः, वातानुकूलिते याने, धर्माचार्यः, धरित्रीदर्शनम्, निदाघ-लहरी, प्रावृड्लहरी कविस्मृतिश्चेति सप्तकाव्यानि म० प्र० संस्कृता-कादम्याः दूर्वा-पत्रिकायां प्रकाशितचराणीति दूर्वासम्पादकायाधमर्णता धार्यते ।

केषुचित् काव्येषु पं० बच्चूलालावस्थिपादैर्यत्र तत्र शोधनमकारीति तेषामनुग्रहः शिरसि धार्यते ।

अनुक्रमः

पृष्ठ-संख्या

अन्तर्जवनिकम्

१. प्रास्ताविकम् १
२. शब्दनौका २
३. छन्दःसप्तकम् ३
४. उन्निद्रम् ४
५. परावर्तनम् ६
६. सन्धानम् ७
७. अनुभावः ९
८. जीवनवृक्षः १०
९ जीवनव्याकरणम् १२
१०. जीवनव्याजः १३
११. सदसद्व्यक्ति १४

वहिर्जवनिकम्

१२. शुष्कं सरः १७
१३. धूमाधारप्रपातः -१ १९
१४. धूमाधारप्रपातः -२ २१
१५. वातानुकुलिते याने २२
१६. मेघच्छाया २४
१७. धनुःखण्डम् २५
१८. नाराशंसी २६
१९. संस्कृतिः २७
२०. चौरपञ्चाशिकापरिशिष्टम् २८
२१. अवशिष्टम् ३१
२२. राज्यमहोत्सव ३३
२३. नर्तनकम् ३५
२४. कविगोष्ठी ३७
२५. नर्मदागोष्ठी ३८
२६. अन्वेषणम् ४३

पृष्ठ-संख्या

२७. शोणभद्रपीठे ४४
२८. सती ४६
२९. सरस्वती ४८
३०. ढपोलशङ्खाष्टकम् ४९
३१. शुभ्रशङ्खाष्टकम् ५१
३२. स्तवमाला ५३
३३. धर्माचार्यः -१ ५५
३४. धर्माचार्यः -२ ५८
३५. समस्यापूर्तयः ६०
३६. अन्योक्ती ६३
लहरीलीलायितम्
३७. धरित्रीदर्शनलहरी ६७
३८. निदाघलहरी ७६
३९. प्रावृड्लहरी ८१
४०. जनतालहरी ८७
गीतवल्लरी
४१. प्रश्नगीतिः ९७
४२. ईश्वरकाव्यविलासः ९८
४३. ध्रुवागीतयः ९९
४४. लोरीगीतम् १०१
४५. प्रेमगीतम् १०३
४६. विक्रयगीतम् १०५
नमोवाक्
४७ कन्याकुमारीकाव्यम् १०९
४८ भरतभावना ११३
४९. कविस्मृतिः ११४
५०. कालिदासबन्दना ११६
५१. राघवभट्टवन्दना ११७
५२. सफ्दरहाशमी ११८
५३. उमामाहेश्वरी ११९

□

१

अन्तर्जवनिकम्

१. प्रास्ताविकम्

व्याख्यागम्यानि काव्यानि ते लिखन्ति विपश्चितः ।
साधारणमहृद्यं च काव्यमत्र प्रकल्पितम् ॥ १

यदि नो शृणुते कश्चिद् यदि नैव पठत्यपि ।
तेन मे किमिह च्छिन्नं विच्छिन्ने विकले भवे ॥ २

अवकाशविहीने ऽत्र जीविते बुद्बुदोपमे ।
शाश्वती रचनाऽपूर्वा कथं वा परिकल्प्यताम् ॥ ३

निःश्वासोच्छ्वासयोः किञ्चदन्तराले स्फुटीभवत् ।
लिखित्वा च लिखित्वा च स्वयमेव विनाशितम् ॥ ४

स्वेदाञ्चितशरीरेण ग्लपितेनान्तरात्मना ।
आवापोद्वापपूर्वं यद् रचितं चान्यथाकृतम् ॥ ५

सृष्टेरत्र महायज्ञ आत्माऽध्वर्युः प्रकल्पितः ।
काव्यं तत्र हविर्भूतं तेन वै जीवनं हुतम् ॥ ६

अन्धे तमसि कृत्स्नेऽत्र मुष्टिताड्ये विजृम्भिते ।
शब्ददीपप्रभा क्षीणा कविनेह प्रकाश्यते ॥ ७

□

२. शब्दनौका

न कविर्न मनीषी नो रसभावविचक्षणः ।
आत्मन्येवात्मना संस्थो नष्टस्वप्नो हृतप्रभः ॥ १

विस्मृतव्यञ्जनालोकश्चाभिधावृत्तिमातृकाम् ।
श्रितः, सोऽहमयं द्वैधभिन्नो द्वन्द्वसमाकुलः ॥ २

भवसागरविस्तारे ऽनन्ते ऽदृष्टतटे तथा ।
शब्दनौकां निमज्जन्तीं नये नित्यं प्रयत्नतः ॥ ३

उन्नायितो ऽयमुडुपो निमज्जंस्तु पुनः पुनः ।
सारं सारमहो दूरं पारं हन्त न लब्धवान् ॥ ४

इयं सा गुणनद्धापि निबद्धा रसवर्त्मनि ।
अनास्थास्त्यानपङ्के ऽत्र नौकेयं मम सीदति ॥ ५

प्रकृतिस्तु परामृष्टा प्रत्ययक्षेपणी धृता ।
झञ्झाऽनर्थकरी किन्तु वृणुते वातमण्डपम् ॥ ६

भ्रान्तिमद्भिः ससन्देहैर्विकटौघैः प्रघट्टिता ।
शब्दनौका तरत्येषा साऽर्थद्वीपं प्रयाति च ॥ ७

□

३. छन्दःसप्तकम्

प्रसुप्तानि चिरं गाढं छन्दांस्येतानि जज्ञिरे ।
निद्रामुषसि सन्त्यज्य सन्नद्धाः श्रमिका यथा ॥ १

भित्तिरुन्नाम्यते स्थापमिष्टकास्विष्टका यथा ।
छन्दसि च्छन्द आधाय तथा काव्यमजायत ॥ २

श्रमनिस्सहगात्रोऽपि नरः सन्नह्यते यथा ।
क्षणमुच्छ्वस्य निःश्वस्य पुनरेव तु कर्मणि ॥ ३

अवरुद्धान्यपीमानि स्यन्दन्ते च पुनः पुनः ।
छन्दांस्युल्लसितानीह नवीभूतानि चेतसि ॥ ४

परायाः परमात् पाराद् गह्वराद्गिर्गतान्यथ ।
चक्षूंष्युन्मीलयन्ति स्म पश्यन्त्या भासितानि च ॥ ५

अण्डं विदार्य निर्याता जातपक्षा विहङ्गमाः ।
डयन्ते स्वैरमाकाशे कूजन्त्यन्योन्यमेलकम् ॥ ६

उप्यमान प्रभूता स्यात् कृष्टिः क्षेत्रे सुसिञ्चिते ।
साम्बाकृत्य मनःक्षेत्रे च्छन्दसां कर्षणं कृतम् ॥ ७

□

४. उन्निद्रम्

हिमनिःष्यन्दिनी प्रातर्वनस्थली भवेद् बहिः ।
आकाशाच्च्यवमानाः स्युरज्ञातं वाष्पबिन्दव ।।

वासकक्षे ऽहमलसो निलीनः स्रस्तरोष्मणि ।
न शोचामि न जानामि का दशा वर्तते बहिः ।।

तथापि शीतलो वायुर्विशन् वातायनाच्छनैः ।
उद्वहंस्तत्सरेणूंस्तान् प्रतिसीरां तरङ्गयन् ।।

आवहन् विविधाञ्छब्दान् कर्णान्तिकं बहिर्भवान् ।
शक्यमालिङ्गितुं त्वेष मनो विस्थापयन् मम ।।

काकस्य पक्षपुटयोः प्रस्तारात् सान्द्रमर्मरः ।
दारयन् पवनं मन्दो रव आकर्ण्यते सृतः ।।

तल्पेऽनल्पवेगेन समुड्डीय विनिर्गतः ।
उपर्युपरि पङ्क्तीनां विद्युत्तन्त्रस्य सोऽण्डजः ।।

इयं सा चीत्कृतवती चटका कर्णदारणम् ।
गतरात्रे प्रसुप्ता या गवाक्षोपरि मे गृहे ।।

हन्ति भूयः स्वचञ्चवाऽसौ काष्ठे तत्र तुलाधृते ।
नूपुरस्येव झङ्कारैर्वातायनाद् विनिर्गता ।।

वङ्गभूमेर्वनग्रामे पद्मायाः पुलिने क्वचित् ।
पुष्करे कर्दमक्लिन्ने शैवलाच्चितवारिणि ॥

कमलानि प्रफुल्लानि मन्ये स्नातानि चातपे ।
समुत्थिता यथा नृणां सन्नद्धा इव ते कराः ॥

द्विचक्रवाहने दुग्धपात्राण्येष नयन् द्रुतम् ।
छलच्छलरवैर्गोपो रणत्कारैश्च निर्गतः ॥

हत्यानृशंस संहार बलात्कारचयं घनम् ।
प्राङ्गणे वृत्तपत्रं स्याद् दुर्भाग्यमिव सञ्चितम् ॥

कार्यव्यग्रा विनिर्यान्ति मन्ये श्रमिककार्मिकाः ।
यथा यथा गवाक्षं मे शनैर्चटति भास्करः ॥

उत्थातव्यं मयाप्येव शय्यां स्वप्नं च मुञ्चता ।
समाह्वयति झाङ्कृत्य गवाक्षान्मां प्रभाकरः ॥

□

५. परावर्तनम्

एते बुक्कन्ति सन्ध्यायां रथ्याश्वानो हि सङ्गताः ।
निर्मक्षिके निशीथे च कुर्वते फेरवा रवान् ।।

परायान्त्येव पापानि विहितानि पुरा क्वचित् ।
समुत्कानि भवन्त्येव सङ्कुलानि तथान्तरा ।।

दिनं पुरा व्यतीतं यच्छ्मशाने भूमिसात्कृतम् ।
उत्तिष्ठति तथाऽकस्मात् स्वप्नच्छेदान्नरो यथा ।।

अपावृत्य गवाक्षं मे मनसो झाङ्करोत्यथ ।
उच्चैःकारं ब्रुवंश्चैवायमहं भोः समागतः ।।

□

६. सन्धानम्

अपि विच्छिन्नवस्तूनि सन्धीयन्ते क्वचित् किमु ।
मृण्मयी पुष्पधानी सा भग्ना कुट्टिममार्जने ॥

शकला निहितास्तस्या गृहिण्या काष्ठविष्टरे ।
सुबहून् दिवसान् यावन्निक्षेप इव रक्षिताः ॥

निधापितानि काव्यानि लेखं लेखं तु कर्गदे ।
विलुप्तानि व्यतिकरे कस्मिंश्चिद् विस्मृतानि च ॥

विहिते चानुसन्धाने नैव लब्धानि तानि च ।
आहितानीव संस्तस्थुः क्वचिच्चाबोधपूर्वकम् ॥

पिहितानीव सन्धान्यामावर्तन्ते मुहुर्मुहुः ।
मनोगवाक्षं सम्प्राप्य कुर्वतेऽन्तसि दर्शनम् ॥

एकलो विचरंश्चापि विच्छिद्येत कथं जनः ।
सन्धीयते समाजेन स्वैकान्ते ऽपि दृढं तु सः ॥

अभ्रङ्कषं समुड्डीनो स्वैरं मोमुद्यते पुनः ।
पक्षी समुद्रपोतस्थो पोतं प्रति निवर्तते ॥

भ्रमत्कुलालचक्रेऽपि स्वयं याति पिपीलिका ।
तथा समाजयात्रायां सङ्गतोऽस्मि पृथक् चलन् ॥

मधूकान्तर्विनिष्पेषनिष्यन्दीनि मधूनि वा।
सम्पीयन्ते विभज्यन्ते निधीयन्ते च मानसे ॥

आधानेन विधानेन सन्निधानेन चैव सा।
निर्मीयतेऽतिमहती परितः कापि संहिता ॥

यद् यद् वक्रं प्रकृत्यैव विच्छिन्नं चार्धमेव वा।
कृतसन्धानमपि तज्जायते च पुनः पुनः ॥

□

७. अनुभावः

आवापोद्वापाभ्यां निर्मितमिह चान्यथाकृतं भूयः ।
चित्रं विगलितरेखं समजनि भूयस्तथाप्येतत् ॥

जीर्णपत्रसञ्छन्ना धरणिः परितो बिभाति वन्यैषा ।
मर्मरशब्दं पत्रं पद्भ्यामास्कन्दितं कुरुते ॥

क्रन्दन्ते पाण्डूनां पत्राणां सञ्चया अभित एते ।
गुप्तं गोपितमथवा किसलयमिह लीयते क्व जातु ॥

गतीरवे संरुद्धे गुञ्जति चेतसि च तस्य झङ्कृतिरिह ।
सरसि क्षिप्ते लोष्ठे तरङ्गवलया इव प्रसृताः ॥

अनुभावं स्वं पृथ्वी प्रकटीकुरुते तुषारलेखाभिः ।
तेषु तेषु च भावेषु व्याप्तो यः खलु रसो वै सः ॥

□

८. जीवनवृक्षः

वरं नश्यत् संसारः सकृन्मे सहसा ह्यसौ ।
निपतत्वथ शुष्कं तत् पत्रं पुष्पमशेषतः ॥

स्थास्याम्यहमेकाकी स्थाणुः प्रेतवने यथा ।
नग्नो निष्प्रभशाखश्च भस्मीभूतमनोरथः ॥

यदि नैव समायाति रमणी मदविह्वला ।
सीधुगण्डूषसेकेन प्लावितुं मम विग्रहम् ॥

तेन मे किमिहच्छिन्नं यदि नूपुरमण्डितैः ।
रणत्क्वाणैः पदैः कापि मसृणं प्रहरेन्न सा ॥

दग्धकाष्ठ इव श्यामो ह्यसंस्तुतमनोरथः ।
तिष्ठाम्यत्र कपालीव हानिस्तेनापि किं मम ॥

नैवाहं कामये दीर्घं मरणं तु शनैः शनैः ।
पत्राणां चैव पुष्पाणां विटपाद् गलनं शनैः ॥

वरं नश्यामि सहसा ज्वालाभिः कवलीकृतः ।
विकीर्णः कणशः सद्यो विलीये वलये भुवः ॥

अथवा नैव विनङ्क्ष्येऽहं परित्यक्तो जनैरपि ।
भूतले मूलमस्त्येव निखातं सुदृढं मम ॥

नवपल्लवसम्भारान् पुष्पराशीन् समन्ततः।
इन्द्रनीलमणेराभां रचयिष्यामि वा पुनः॥

जना निवर्तमानास्ते दग्ध्वाऽऽत्मीयं जनं चितौ।
छायां मम समाश्रित्य द्रक्ष्यन्ति स्पृहया च माम्॥

□

९. जीवन-व्याकरणम्

न गुणं प्रापिताः केचिन्नवा वृद्धिमुपागताः ।
इतो लोप इव च्छिन्ना मनस्येव मनोरथाः ॥

उत्थिताः पतितास्तास्ताः प्रत्याहारविवर्जिताः ।
क्विप्प्रत्ययनिभा आशा विलीयन्ते क्वचित् तथा ॥

सप्रत्ययपरामृष्टाः क्रुदन्तं गमिता अपि ।
सकर्मका अहो जाताः सोपसर्गाः क्रिया वृथा ॥

विधिना च निषेधेन कर्माकर्मविचारितैः ।
उत्सर्गेणापवादेन सकलं जीवनं गतम् ॥

न महाभाष्यसन्दृब्धं नाष्टाध्याय्यामुपागतम् ।
कृत्स्नं व्याकरणं वेद जीवनस्येह कः सुधीः ? ॥

□

१०. जीवनव्याजः

जीवनव्याजसङ्घातमाच्छिद्याच्छिद्य लीयसे ।
अजस्रं छलयन् मां त्वं निश्छलश्च प्रगीयसे ।।

त्वयैवं छलितो नाम तथाचैवं प्रवञ्चितः ।
उज्झितोऽप्यथवैकाकी न जहृयां स्वीयपद्धतिम् ।।

न बिभेम्यहमेकाकी द्वितीयं तु सृजामि यत् ।
व्याजमन्यं लभे नूनं जीवनाय पुनः पुनः ।।

□

११. सदसद्व्यक्तिः

धगद्धगज्ज्वलन्तीषु कथं ज्वालास्वहं त्वया ।
निक्षिप्तो निर्दयं दह्यमानस्तत्र तथोज्झितः ॥

अङ्गारैराचिततनुः कष्टं क्रन्दितवानहम् ।
भर्त्सनं ते भृशं कुर्वन् शब्दैर्मर्मविदारणैः ॥

तप्तहेमप्रभश्चाथ विशुद्धो बहिरागतः ।
पश्यामि त्वां तथा देव स्मयमानं समीपतः ॥

□

२

बहिर्जवनिकम्

१२. शुष्कं सरः

बलिं दत्त्वा शूरो यदिह वनजारः कलितवान् ।[1]
यदेकं प्राणानामभवदवलम्बश्च नगरे ।
सरस्तत् कालेन व्रजितमतिदीनां खलु दशां
हतां दर्शं दर्शं भवति हृदयं दूनमिव याम् ॥ १

अनूचानैः पूर्वं विहितमयनं लोकनयनं
यथाऽद्यत्वे जातं मलकलिलपङ्कैकवलितम् ।
तथा नश्चेतोऽदो व्रणयति सरः सागरगतं
परं शुष्कं साधोर्हृदयमिव नाशेन सुहृदाम् ॥ २

स आश्वस्तो नेता वदति बहुभङ्गीभणितिभिः
करिष्यामः शुद्धिं सरस इति चाश्वासयति सः ।
परिध्वस्तं जीर्णं भवनमिव शीर्णं किमु सरो
विवेकभ्रष्टानां पतनमभितः सूचयति तत् ॥ ३

१. बहुशः खननेऽपि जले अप्राप्ते कश्चिद् बनजारो नरबलिं ददौ, तेन जलाप्लुतं सागरमध्यवर्ति सरोवरं सञ्जातमिति किंवदन्ती ।

यथा नात्र स्नानं भवति ननु घट्टेष्विव पुरा
जलं जातं सर्वं क्षुभितमिव राष्ट्रं कलुषितम् ।
तथा नश्चेतांसि व्रणयति सरः सागरगतं
रसो बीभत्सोऽर्वाक्तनरसिकलोकैरिव हतः ॥ ४

न या मम्लौ कम्रा तरणसवनस्नाननिरतै-
र्नरस्त्रीबालानां शतश इह सङ्घैर्जलततिः ।
इदानीं सा शृङ्गाकुलितजलभङ्गास्ति महिषै-
र्वराहैर्वा मुस्ताक्षतिमपि च कुर्वद्भिरभितः ॥ ५

विदीर्णेषा भूमिः प्रखरतरहिंस्रार्ककिरणै-
र्जलं जातं धूलिप्रचयकलुषं स्त्यानरुधिरम् ।
सरो भ्रश्यद्बन्धं परिगलितसत्त्वं गतरसं
व्यथावृत्तां मन्ये कथयति कथां भारतगताम् ॥ ६

यथा दृष्टं दूरात् क्वचन कुहरे लीनमिव तत्
मनस्तापं धत्ते सकलमुपतापं च जनयत् ।
पुनर्दृष्टं मार्गे जडयति पुरोगामिनि मनः
पुराभूतः शोको व्यथयति यथा नूतन इव ॥ ७

गतं शैवालं तत् परिहसितदर्भाङ्कुरचयम्
अतन्द्रा चन्द्राभा तदनु विहता सा कुमुदिनी ।
कथञ्चित् तिष्ठन् यो घृणितमलपङ्काकुलजले
परं दीनो मीनः क्व नु खलु सरेत् पक्षरहितः ॥ ८

सरोऽदभ्रे श्वभ्रे प्रकटयति तत् स्वीयमुदरं
क्षुधाखिन्नो दीनो ग्लपितवदनः कश्चन यथा ।
गता वर्षास्तृष्णां कथमपि न हृत्वाऽस्य सरसः
कथञ्चित् तत्प्राणित्यहह नलिकाकर्दमभरैः ॥ ९

□

१३. धूमाधारप्रपातः [१]

[१]

पश्यतो मज्जयन् गाढं रघुनाथशिरोमणेः ।
जले स्वोपज्ञशास्त्रं स श्रीचैतन्यमहाप्रभुः ॥
हसति स्म यथा द्वन्द्वमवधूय मुहुस्तथा—
धूमाधार प्रपातोऽयं विहसन्निव दृश्यते ॥

धूमो यत्रास्ति तत्राग्निरिति व्याप्तिः प्रकीर्त्तिता ।
नैयायिकेषु प्रथितां व्याप्तिमेनां विखण्डयन् ॥
धूमराजिमविच्छिन्नां भावयन्नग्निना विना ।
धूमाधारप्रपातोऽयं विहसन्निव दृश्यते ॥

वह्निः कुत्र भवेदस्मिन् विपक्षे तु महाह्रदे ।
इति ब्रवीति शास्त्रज्ञो नैयायिकशिरोमणिः ॥
हेत्वाभासमहो सत्यं कविबुद्धौ विभावयन् ।
धूमाधारप्रपातोऽयं विहसन्निव दृश्यते ॥

[२]

भित्तावुल्लोलधारायां लिखितेन रवेः करैः ।
उत्थायोत्थाय पतता सविलासमनोहरम् ॥
चञ्चलेनेन्द्रचापेन नभोगं तत् स्थिरं धनुः ।
धूमाधारप्रपातो ऽयं विहसन्निव दृश्यते ॥

[३]

छायाचित्रं ग्रहीतुं ते यतन्ते ऽस्य जना मुहुः ।
कथं न्वस्य समुच्छ्रायश्छायाचित्रं परामृशेत् ॥
सङ्गोप्य स्वीयसौन्दर्यं छायाग्राहकयन्त्रतः ।
धूमाधारप्रपातो ऽयं विहसन्निव दृश्यते ॥

[४]

क्वचिद् रजतसंकाशैः शरच्चन्द्रनिभैः क्वचित् ।
रञ्जितैर्बभ्रुवर्णैर्वा क्वचिद् बालार्करश्मिभिः ॥
विचित्रोपलविस्तारै रेवां पश्यन् जडीकृताम् ।
धूमाधारप्रपातो ऽयं विहसन्निव दृश्यते ॥

[५]

सहठं यामि यामीति रेवाया अङ्कतः सृतः ।
संस्खलन् धारितो गाढं मातुः क्रोडे मुहुः शिशुः ॥
आलक्ष्यदन्तमुकुलो ऽव्यक्तवर्णवचा यथा ।
धूमाधारप्रपातो ऽयं विहसन्निव दृश्यते ॥

□

१४. धूमाधारप्रपातः [२]

[१]

हैयङ्गवीनमृदुलश्चीनांशुकमनोहरः ।
फेनबुद्बुदराशिर्मे प्रस्तरैर्जर्जरीकृतः ॥
इत्यास्फाल्य शिरः स्वीयं शिलायां मूर्च्छितो मुहुः ।
धूमाधारप्रपातोऽयं विषीदन्निव लक्ष्यते ॥

[२]

प्रचलन्नुन्नते मार्गे प्रस्तराञ्चितदन्तुरे ।
संस्खलन् सहसा गर्त्ते गम्भीरे पतितो यदा ॥
समुत्थातुमलं श्वभ्राददभ्रान्न बभूव सः ।
हाहाकाररवोन्मिश्रं विलपंस्तत्र लीयते ॥
पर्वताद् वीक्ष्य पाताले विलयं जलसन्ततेः ।
धूमाधारप्रपातोऽयं विषीदन्निव लक्ष्यते ॥

[३]

कारागारनिरुद्धां तां राष्ट्रलक्ष्मीमिव च्युताम् ।
रेवां जीवनदात्रीं तु बन्धनैर्बहुपीडिताम् ॥
शोषितां च स्वदेशस्य जनतामिव वीक्ष्य ताम् ।
धूमाधारप्रपातोऽयं विषीदन्निव लक्ष्यते ॥

□

१५. वातानुकूलिते याने

नैव धूलिर्न वा पङ्कः परिमार्जितकुट्टिमे ।
कदलीफलशिम्बाऽऽदेर्नैव सन्ति त्वचस्तथा ॥
विकीर्णं यत्र वा तत्र, नोच्छिष्टं विद्यते क्वचित् ।
न च खादितवस्तूनामवशेषा इतस्ततः ॥
सर्वमेवोपपन्नं हि याने वातानुकूलिते ।
वातोऽपि प्रविशत्यत्र मानवानां समाज्ञया ॥

□

तरुणार्भकसंरावैरनामृष्टमनाकुलम् ।
गोष्ठीनां वनितानां वा नादैरप्यनिनादितम् ॥
संसक्तेषु द्वितीयायाः श्रेण्या यानेषु सञ्जहत् ।
कोलाहलमहो सर्वमात्मन्येवात्मना रतम् ॥

□

अस्खलत्सुखसम्पातं स्यन्दमानं शनैरिव ।
उड्डीन इव विहगः पारिवाहपथेऽथवा ॥
याति यानमहो स्वैरं यन्त्रितं चाप्ययन्त्रितम् ।
यात्री यन्त्रितमात्मानं तथापि मनुते कथम् ? ॥

□

गवाक्षाद् वीक्षितुं शक्यः सानौ श्लिष्टो बलाहकः ।
इक्षुक्षेत्रनिषादिन्यः शालिगोप्त्र्यश्च डिम्भकाः ॥
कवोष्णः शिशिरस्त्वत्र ग्रीष्मश्च शिशिरायते ।
जनसम्मर्दजनिता विहता किन्तु सोष्मता ॥

□

सोपहारो यथा प्रेयान् द्वारोपान्तनिरन्तरः ।
कपाटद्वयमावृत्य मानवत्या निराकृतः ॥
वनान्तवान्तवातोऽयं लावण्येन सुपूरितः ।
सङ्घट्टनात् परावृत्तः काच-वातायनश्रिया ॥

□

छायायामम्बरस्यैव समासीनो दिगम्बरः ।
भृङ्गारेण जलं भृत्वा धारायन्त्रान्मुहुर्मुहुः ॥
अधिस्थण्डिलमेवासौ स्नाति मन्त्रं जपन् मुदा ।
छप्छप-ध्वनिरावोऽत्र नेत्रेणैव निशम्यते ॥

□

अवस्थानात् समायातमन्यस्माद् भुवनादिव ।
विस्फारिताधरोष्ठाभ्यां विवृताद् वदनात् सृतम्॥
कस्यचित् प्रेरितं कस्मै श्रुतं तेन न वा श्रुतम् ।
अव्यक्तवर्णमाह्वानं नात्र श्लिष्यति पार्श्वतः ॥

□

वृत्तपत्रे दत्तनेत्रा यानेऽस्मिन् यात्रिणः स्थिताः ।
दिवि संस्था इव सुरा दृष्टा नैव बहिर्जनैः ॥
तमोऽवतरणं लक्ष्यं नैवावस्थान-सङ्गतम् ।
सहसाऽच्छिद्य तमसा नीयते भुवनं क्वचित् ॥

□

१६. मेघच्छाया

[१]

महासागरसङ्काशे नीले तमालकानने ।
मेघच्छाया तरत्येषा लघुनौकेव मन्थरम् ॥

[२]

गिरेः पर्यन्तदेशेभ्यः काननेषु पलायते ।
उपत्यकासु विन्ध्यस्य मेघच्छाया द्रुतं सृता ॥
अन्विष्टा सततं दीना यूथभ्रष्टा मृगीव सा ।
पृष्ठप्रसक्तघर्मेण व्याघ्रेणेवानुधावता ॥
भीतिसंहृतसर्वाङ्गी रक्षणोपायविह्वला ।
पतिता गहने गर्ते सहसा मार्गमजानती ॥

[३]

निरस्तपादपे देशे द्रुतं कुद्दालचालनैः ।
खनतः खरहस्ताभ्यां खरं तपति भास्करे ॥
सत्त्वरं श्वसतो दीर्घं सोच्छ्वासप्राणितस्य च ।
लापादार्त्तिं च नीतस्य घर्मेण घनिकेन च ॥
ग्लपिते श्रमिकस्यास्ये स्वेदबिन्दुविचित्रिते ।
क्षणं मुखपटप्रीतिं कुर्वती करुणान्विता ॥
वैषम्याकुलसंसारे तापप्लुष्टेऽतिखेदिते ।
उदितेयमहो मेघच्छाया छायां प्रतन्वती ॥

□

१७. धनुःखण्डम्

वल्मीकाग्रादुदयते धनुर्दण्डं विखण्डितम् ।
सन्नद्धं मण्डलाकारमाखण्डलस्य लम्बितम् ॥

इदं शकुन्तलायाः स्याच्चित्रं दुष्यन्तनिर्मितम् ।
आवापोद्वापसहितं विहितं चोज्झितं पुनः ॥

मेघभित्तौ जलार्द्रत्वाद् मार्जितं निर्मितं पुनः ।
तथापि तस्या लावण्यं रेखास्वत्र समन्वितम् ॥

कालत्रयभ्रमल्लोलमनोमेघपटेऽङ्कितम् ।
सम्भिन्नं सम्प्लुतं नाना-घटना-सङ्ग-सङ्कुलम् ॥

अथवेदं स्मृतीनां स्याच्चित्रं वर्णविचित्रितम् ।
वर्तमानकुठारेण खण्ड्यमानं पुनः पुनः ॥

□

१८. नाराशंसी

नारी रोदिति, नो मुधा निपतिता बाष्पस्य ते बिन्दवः
सोच्छ्वासं पृथिवी प्रयाति च लताः मुञ्चन्ति पर्णाश्रुकम् ।
धारां वाष्पजलाविलामपि नदी, नृत्यन्ति नो केकिनः
पृच्छन्त्येतदहो वनानि-कुररी केयं कथं क्रन्दति ?

हंहो रोदिति यन्नरो नभसि ते स्युः पुष्करावर्त्तकाः
सञ्छन्नाः प्रलयो भवेत् पुनरहो दीर्णं नभो वा भवेत् ।
ज्वालालीढमुखाः स्फुटाश्च गिरयः पृथ्वीतले स्युर्गिले-
दौर्वाग्निर्जलधिं, तथापि विरुदन् सन्दृश्यते किं नरः ? ॥

□

१९. संस्कृतिः

सबलात्कारमामृष्टा साध्वीव वनिता हृता ।
गोपायन्ती मुखं स्वीयं लीयते किल संस्कृतिः ॥

संस्कृतिर्भारतीयैषा न ममार न जीर्यति ।
इति पुष्पितया वाचा हन्यते बत संस्कृतिः ॥

क्वचिल्लुप्ता क्वचिद् गुप्ता सान्तर्नीरा सरस्वती ।
शास्त्रेष्वेव परिज्ञाता विद्वद्भिः किन्नु संस्कृतिः ॥

कृत्वा प्रतिकृतीश्चैषा रक्ष्यते सङ्ग्रहालये ।
म्रियमाणा सभायां सा स्तूयते बहु संस्कृतिः ॥

सत्पात्रदत्तसम्पत्तिः प्रतिपत्तिः सुशिष्यगा ।
सुकृतिः सज्जनस्येव क्षीयते नैव संस्कृतिः ॥

□

२०. चौरपञ्चाशिकापरिशिष्टम्

अद्यापि मानसगता प्रतिभेव सद्यो
नेत्रे ममोत्सुकतरे सहसा स्फुरन्ती ।
तैस्तैः पदैर्मधुरझङ्कृतिमादधाना
सा ऽऽ विर्भवेत् सपदि मृत्युपथे कदाचित् ।।

पश्यामि पश्चिमतया सकृदेव वा तां
ध्वान्ते घनान्तपटले तडितः प्रभाभाम् ।
कारुण्यपूरपरिपूरितदृष्टिरस्याः
पाथेयमेव मम मृत्युपथस्य सा स्यात् ।।

मन्दस्मितेन्दुवदना करुणाकटाक्ष-
धाराधरेण यदि सा स्नपयेत् तनुं मे ।
जृम्भाविडम्बिविकटाननसम्मुखीने-
कालेऽवलीढमपि मां वृणुते न चिन्ता ।।

अद्यापि बिम्बफलरक्ततराधरोष्ठात्
किञ्चिन्मनोगतमहो गदितुं ह्यशक्तात् ।
श्रुत्वाऽस्फुटं किमपि बुद्बुदमक्षरं तत्
कालस्य भीतिरहित शृणुयां न शब्दम् ।।

यज्जीवनं मम जनेः प्रभृति व्यतीतं
त्वावर्तबुद्बुद इव क्षणभङ्गुरं तत् ।
तस्मिन् क्षणो मम समुल्लसितस्तदानी
यस्मिन् क्षणे सह तया मम सङ्गमोऽभूत् ॥

भग्ने तु जीवनघटे जलबिन्दवोऽमी
कालस्य, मौक्तिकनिभास्त्वरितं क्षरन्ति ।
कालं ह्यतीत्य लसितं च तदीयरूपं
चित्ते धृतं यदि, बिभेमि न जातु कालात् ॥

दूरं प्रयान्ति मम रम्यदिनान्यतीता-
न्यग्रे विजृम्भृणमिव प्रकरोति शून्यम् ।
विच्छिन्नधूश्च विकलो व्यथितो जडोऽयं
गाढान्धकारमिव मज्जति मेऽन्तरात्मा ॥

यज्जीवनस्य मरणस्य च सन्धिकाले
तिष्ठामि, चैष विनिवर्तनशक्तिहीनः ।
कालानिलाहत इव प्रगते प्रदीपे
धूमायमानगतदीप्तिदशेव दूये ॥

आत्मा घटो निपततीह घनान्धकूपे
कालस्य घोरविवरे विनिपात्यमानः ।
नो मे भयं न च पुनर्मम कोऽपिशोक-
स्तस्याः स्मृतिर्ननु समुद्धरतीह रज्जुः ॥

आरोप्य मां सपदि सन्नतशूलपाशे
मृत्योर्मुखे स्फुटतरे पुरुषाः क्षिपन्ति ।
सा चेत् समेत्य तदनन्तरमेव गात्रं
ममामृशेदुपरतो न मृतोऽपि चाहम् ॥

यद्वा, न यातु मम दृष्टिपथेऽथ साऽस्मिन्
काले, च राजपुरुषास्तु हरन्तु मेऽस्मून् ।
एतावदेव बहु किं न ममास्ति यत् सा
प्राप्ता मया गुणमयी खलु जीवनेऽस्मिन् ॥

□

२१. अवशिष्टम्

घण्टापथे रथे याति शब्दो धडधडेति सन्।
कम्पयन् सर्वमध्वानं धरित्रीं दारयन्नभूत्॥

निष्कम्पचामरशिखा केसरैर्वातचुम्बितैः।
अलङ्घ्याः स्वै रजोभिस्ते रथ्या अक्षमया द्रुताः।

पवनं जवना लङ्घमाना त्यजन्ति च क्षमाम्।
आलोडयन्तः पृथिवीं खुरनिर्घातकम्पिताम्॥

रणत्कारैः किङ्किणीनां ठणत्कारैश्च चक्रगैः।
खुराणां टप्टपैश्चैव शब्दस्तत्र व्यजृम्भत॥

चले च रथे राज्ञो दरत्रस्तजनोज्झिता।
क्षुण्णा बहुखुराघातैः पदवी सा स्म लक्ष्यते॥

सखिभिः सह खेलद्भिर्धावित्वा सहसोज्झितः।
जोषं तस्थौ शिशुः स्तब्धो राजमार्गे चमत्कृतः॥

रथोऽन्तिकमगात् तस्य लक्ष्यबद्धः शरो यथा।
अन्तरा च शिशुं रथ्यान् क्षणार्धेन समागता॥

तरसाऽश्वपदैर्लुप्यमानं क्रूरतया पथि ।
आच्छिद्य रथरेखातो माता तस्य ररक्ष तम् ॥

गतो रथो गता रथ्या आस्कन्द्य स्वीयषद्घतिम् ।
अवशिष्टा तथा वार्ता रथयानस्य तद्दिने ॥

अवशिष्टाश्च रेखास्ता रथचक्रविनिर्मिताः ।
अवशिष्टा तथा माता शिशुं सङ्गोप्य वक्षसि ॥

□

२२. राज्यमहोत्सवः

उद्घाटनार्थमाहूतो राजा राज्यमहोत्सवे ।
याच्ञाभिः करबद्धाभिः मन्त्रिभिः साग्रहं मुहुः ॥

ददौ चाश्वासनं सद्यो व्यस्तो व्यस्ततरोऽपि सन् ।
दत्वापि स्वीकृतिं स्वीयां, राजा तत्र च नाययौ ॥

न ययौ नापि वा तस्थौ समाजो विदुषां यदा ।
नैवायास्यति राजेति दूतस्तस्य व्यजिज्ञपत् ॥

भङ्ग्या भणित्या बहुशः प्रभाव्योऽद्य प्रभुः किल ।
इति तेषां दिवास्वप्ना भग्नाः सूचनयाऽनया ॥

कथञ्चित् तैस्तु निर्व्यूढोऽराजक एव चोत्सवः ।
विद्वद्भिर्विंशतिप्रायैर्द्वित्रैस्तै राजमन्त्रिभिः ॥

गम्भीरां गूढमुद्रां स्वे मुख आरोप्य संस्थिताः ।
विद्वांसो विंशतिप्राया द्वित्रास्ते राजमन्त्रिणः ।।

मनःसु सादमायान्ती सोत्सवं चाप्यमानयत् ।
मध्येशालं समासीना जनानां पञ्चविंशतिः ।।

शालाया बहिरेतच्च नैव केनापि लक्षितम् ।
जीवनस्य प्रवाहोऽपि प्रववौ तत्र निरन्तरम् ।।

उत्सवस्यैव वार्तां तु न जानन्ति स्म ये जनाः ।
राज्ञोऽनागमनं तत्र जानीयुस्ते कथं तदा ।।

आपणे पणनं हट्टे सङ्घट्टो जनतारवः ।
पूर्ववत् प्रचलत्येव कृत्यव्यग्रो जनोऽभवत् ।।

साधुवादैर्धन्यवादैः सम्पन्नः स महोत्सवः ।
अधोमुखी च निर्याता शालाया यदा पुनः ।

गम्भीरमुखमुद्राणां विदुषां पञ्चविंशतिः ।।
ताम्बूलस्यापणे गृह्णन् मुखे ताम्बूलवीटिकाम्,

नरः कश्चन वाचालः पृष्टवान् पार्श्ववर्त्तिनम्-
कस्यैषा शवयात्राद्य पथि गच्छति सम्मुखम् ? ।।

□

२३. नर्तनकम्

सङ्गोष्ठ्यां भवतीह नर्तनमहो विद्वत्सभामण्डले
तत्तत्तथैयततं तथेति सुभगं नर्तिष्यते नर्तकी ।
आयातेह, रसं च गृह्णत मुदा, ताम्बूलमालादिकं
सर्वं क्लृप्तचरं तथा प्रगुणितं भोज्यं भोग्यं च वः ॥

यच्छब्दार्थविचारलीनमनसा नीता विनिद्राः क्षपा
ज्ञानं वाधिगतं समाहितधिया व्यर्थं समस्तं गतम् ।
यच्छास्त्रेषु परिश्रमो ऽपि विहितो यद्वा कृतं चिन्तनं
तत्सर्वं तु वृथैव नैव हि ततः कश्चिद् गुणो गोष्ठके ॥

सम्मानं लभते नटी खलु यथा वाग्देवता शारदा
सैव ज्ञानविशारदा भगवती लीलालया भास्वरा ।
विद्वान् पश्यति काष्ठपुत्तल इव ध्यायन् प्रनृत्तां च तां
ह्यस्तव्यस्तसमस्तधीर्जड इव प्रज्ञादरिद्रः क्षणम् ॥

शास्त्रं यातु रसातलं बुधजनस्तस्मादधो गच्छतु
संस्कारः कृमिकीटकोटिनिवहैः स्याद् भक्षितस्तेन किम् ?
पश्यामो वयमत्रमुग्धमुकुलीभूतैरहो लोचनैः
सङ्गोष्ठ्यां स्मयमानमञ्जुमृदुलां तन्वीं शुभां नर्तकीम् ॥

यो वै नर्तयति प्रजां च निखिलां योषां यथा दारवीं
सो ऽप्येतान् मनुते विपश्चित इतः क्रीडाकलापुत्तलान् ।
भङ्क्त्वा सूत्रमिदं धृतं च करयोरस्यैव चेमाः प्रजा
विद्वांसश्च समुत्थिता यदि ततो रुद्धं भवेन्नर्तनम् ॥

□

२४. कविगोष्ठी

कामं कवित्वलेशोऽपि कवितायां भवेन्न वा ।
मञ्चमारुह्य यन्नाट्यं क्रियते काव्यमेव तत् ।।

अतिवाहितरागेऽस्मिन् क्षरत्संवेदने तथा ।
कवित्वमधुना लोके तृणायैव मतं बुधैः ।।

न रतिर्न गतिः काव्ये नापि वा क्रमते मतिः ।
कवयस्तु भविष्यामः सिंहनादेन गर्जनात् ।।

यद्वा ऽतिमधुरैर्नादैर्लयताल समन्वितैः ।
मेचकश्रुतिकण्ठेन गीयते काव्यमेव तत् ।।

कविम्मन्यास्तु साकूतं साटोपं बहुभङ्गिभिः ।
भुजमुत्तोल्य कूर्दन्ति, लयताल समन्वितम् ।।

गायन्ति मधुरं वा ते तौर्यत्रिकप्रतीतये ।
अहो-अहो इति श्रोतृ-मण्डली कुरुते मुहुः ।।

काव्यव्याजेन सम्प्राप्ते कोलाहलहलाहले ।
वाणि प्राणिषि तन्मध्ये धन्या ते ऽस्ति सहिष्णुता ।।

□

२५. नर्मदा-गोष्ठी

नर्मदामाश्रित्य सङ्गोष्ठी बुधैरायोजिता कदा ।
लीना प्रवाहरागे स्वे न जानाति स्म नर्मदा ॥
नाना दिग्भ्यो बुधाः श्रेष्ठा नर्मदातटमाययुः ।
नर्मदा तु यथापूर्वं प्रावहन्नविजानती ॥

गिरेः कुक्षिं समुत्पाट्य विषमोपलघट्टिता ।
चण्डझञ्झानिदाघेभ्यो जुगोपात्मानमच्युता ॥
भक्तिच्छेदैर्विशीर्णापि सङ्कलय्य निजं वपुः ।
शाश्वतीभ्यः समाभ्यः सा स्यन्दमाना सरिद्वरा ॥

किन्तु ज्ञातवतीदानीं न गन्तव्यं चिरं मया ।
यतस्ते हि समायाता बद्धुं मां बन्धकैरिति ॥
अवरुद्धा च रिक्ता च गह्वरे चैव यन्त्रिता ।
विशीर्ये विलयं याता न भविष्यामि नर्मदा ॥

समेता नर्मदातीरे विदुषां पञ्चविंशतिः ।
मतमेतदभिव्यानक् नर्मदास्त्यजरा ऽमरा ॥
नावरुद्धा न रिक्तैषा गह्वरे नैव यन्त्रिता ।
विशीर्येत लयं याता न कदापीति नर्मदा ॥

धन्यवादैश्च बहुश एवं वर्धापनैस्तथा ।
महाजनाः प्रमुदिता भावयन्तः परस्परम् ॥

अथाहुर्नर्मदातीरे युक्तमायोजनं त्विदम् ।
नर्मदामेव चाश्रित्य गोष्ठी सेयं प्रवर्त्तते ॥
अहो अहो नमो ऽस्मभ्यं कृतं पुण्यमिदं महत् ।
इत्येवं भावयन्तस्ते प्रशशंसुः परस्परम् ॥

□

'अथासीन्नर्मदातीरे काचिदत्र सरस्वती ।'
इत्यन्वेषकमूर्धन्यः सहसा प्राह तेषु सः ॥
'सरस्वत्यास्तु का वार्ता, सा प्रयागे लयं गता ।
कथावशेषतां याता ह्यतीते सा सरस्वती ॥'

इति तं बोधयन्तस्ते विद्वांसः खेदमागताः ।
सरस्वत्यास्तु लोपेन खेदप्रस्तावमानयन् ॥
सङ्कल्पं कृतवन्तश्च तस्या अन्वेषणाय ते ।
सङ्कल्पस्य क्रियार्थं च सङ्कल्पस्तैः कृतः पुनः ॥

क्रियार्थाय तथा शोधयोजना महती मुहुः ।
प्रकल्पनीयेति सङ्कल्पं कृतवन्तो महाजनाः ॥
सर्वकारप्रतिनिधिर्योजनायाः प्रपूर्त्तये ।
सार्धद्विलक्षदानाय सामोदं स वचो ददौ ॥

अहो अहो नमोऽस्मभ्यं कृतं पुण्यमिदं महत् ।
सरस्वत्याः स्मृतिः सापि रेवया सह यत्कृता ॥
त्वं धन्योऽसि वयं धन्या धन्या यूयमहो इति ।
धन्यवादान् वदन्तस्ते प्रशशंसुः परस्परम् ॥

□

आसीन्नाविकपुत्री या बाला कापि सरस्वती ।
रेवाया अपरे तीरे कुटीरे सा ऽवसत् तथा ॥

पुरा कूलङ्कषा जाता रेवा चण्डी बभूव सा।
वर्षासु प्लाविते लोके भृशं पूरो व्यवर्धत ॥

ओघे निमज्जमानासु प्रजास्वेषा सरस्वती।
नौकया तारयन्ती ता एकैकशः समुद्धरत् ॥
एकाकिन्युडुपेनैव तीरात् तीरं स्म धावति।
प्रत्यादेशश्च रेवाया सञ्जातैषा सरस्वती ॥

□

गोपायित्वा मुखं स्वीयमन्वेषकशिरोमणिः ।
प्रचचाल तथैकाकी चित्ते ध्यायन् सरस्वतीम् ॥
रेवाया अपरे तीरे आययौ स समुत्सुकः।
पुरा साक्षात्कृता येन यत्रासीत् सा सरस्वती ॥

डिम्भं स्तनन्धयं लालयन्ती रुदन्तमेव सा।
तर्जयन्ती स्वपुत्रीं सा तेन दृष्टा सरस्वती ॥
'अपि प्रत्यभिजानाति भवती मां पुरा मया।
साक्षात्कारो भवत्या म वृत्तपत्रे प्रकाशितः ॥

सर्वकार पुरस्कारं भवत्यै प्रददौ यदा।"
इति पृच्छति तस्मिन् सा निजगाद सरस्वती ॥
ज्येष्ठां तु तनयां स्वीयां प्रेषयन्त्युटजान्तरे ।
रुदन्तमश्रुसिक्तास्यं लालयन्ती स्तनन्धयम् ॥

गच्छ सम्प्रति भद्र त्वं कृत्यव्यग्रास्मि साम्प्रतम्।
अन्नं पक्ष्यामि नेष्यामि बालस्यास्य पितुः कृते ॥
इत्युक्त्वैव सकृत् तूर्णं स्त्रोटजे ऽन्तर्हिताऽभवत्।
प्रत्यागतो निराशो ऽसावन्वेषकशिरोमणिः ॥
विदुषां समवायः स यत्रापूर्वः प्रवर्त्तते।

□

एषा प्रसन्नसलिला पुराणेष्वपि नर्मदा।
वर्णिता स्यन्दमानैषा चेतिहासेऽपि नर्मदा॥

इत्येवं कथयन्तस्ते श्लोकान् बहुशो जगुः।
नर्मदास्तवमालां च जपन्तो मुदिता बुधाः॥

पण्डितप्रवरः कश्चित् तेषु मूर्धन्यतां गतः।
मतमेतदभिव्यानक्—नास्त्येषा नर्मदा नदी॥

नर्मदा तु नदी नास्ति माता भगवतीत्वियम्।
ब्रह्मणोऽपि च मातेयं दिव्या चैतन्यरूपिणी॥

ततश्च विदुषां गोष्ठी सङ्कल्पं विदधे पुनः।
नर्मदा न नदी वाच्या देवी मातेति कथ्यताम्॥

प्रस्तावे पारिते चास्मिन्नुदग्रस्तालिकाध्वनिः।
हर्षोल्लासरवो ऽपूर्वस्तुमुलः समजायत॥

श्रुत्वा तं तुमुलं घोषं घोरं कलकलं तथा।
नर्मदा सा नदी जोषं स्मयते स्म विषादिता॥

समापने तु सङ्गोष्ठ्याः सचिवोऽध्यक्षमेव सः।
अध्यक्षः सचिवं चैव प्रशशंस मुहुर्मुहुः॥

एवमेव महाध्यक्ष उपाध्यक्षं शशंस सः।
उपाध्यक्षो महाध्यक्षं धन्यवादैरवर्धयत्॥

एवं समापयामासुः सङ्गोष्ठीं ते मुदान्विताः।
दिष्ट्या वर्धापयन्तश्च भावयन्तः परस्परम्॥

समाप्ते समवाये सा विदुषां पञ्चविंशतिः।
यात्राव्ययं समादाय ततश्च प्रस्थिताऽभवत्॥

प्रस्थितेषु ततस्तेषु नैव केनापि लक्षिता।
स्तिमितप्रवहारेवा विषण्णा च विशेषतः॥

वीचिहस्तैश्च सा व्यग्रा तानाह्वयति नर्मदा ।
कथं ते विनिवर्त्तन्तां विद्वांसस्तु गता गताः ।।
विग्ना रुरोद भूयः सा कुररी वृक्षसंस्थिता ।
काकः कश्चन निर्भर्त्स्य तामेतन्निजगाद सः ।।

कथं चीत्कुरुषे मूढे कस्ते रावं शृणोत्यहो ।
न ते प्रतिनिर्वर्त्स्यन्ते विद्वांसस्तु गता गताः ।।
इत्याक्रोशति तस्मिंस्तत् रेवाया हृदयं जलम् ।
अन्धेन तमसाऽच्छन्नं ततो भूयो बभूवह ।।

वक्षस्यस्याः शिलानां स भारो गुरुतरोऽभवत् ।
तथापि प्रहसन्ती सा स्वयमाह च नर्मदा—
आस्तां तावन्मयेदानीं वहनीयं हि पूर्ववत् ।।
अन्धकारे वर्धमाने नीरवे तटसंस्तरे ।
अवसन्नासु चापःसु समायाता सरस्वती ।।

स्वघटे जलमादातुं नदीतीरं जगाम सा ।
आममर्श स्वहस्तेन स्तब्धं तन्नर्मदाजलम् ।।
मृदु संवाहयन्तीव निश्चेष्टां नर्मदां मुहुः ।
तेन प्रसन्नसलिला प्रावहन्नर्मदा पुनः ।।

□

२६. अन्वेषणम्

(सॉनेट्)

कृष्णकञ्चुकसञ्छन्ना
भीता सम्पिण्डिता इव
मेघच्छाया भ्रमन्त्येता
लज्जयेव जलीकृताः ।

अवतीर्य शनैर्नीचैः
शिखरेऽमरकण्टके ।
अधोऽधश्च पुनर्याता
महाश्वभ्रं वनं प्रति ॥

रेवारोधःसु शुष्केषु
निर्जलेषु समन्ततः ।
अन्विष्यन्ति भ्रमन्त्यस्ता
लुप्ता गुलवकावलीः ।
नैव यास्तत्र रोहन्ति
रेवाखण्डे विखण्डिते ॥

□

२७. शोणभद्रपीठे

(सोनेट्द्वयम्)

[१]

प्रत्याख्यातविवाहासीत् पूर्वं दुराग्रहान्मुहुः ।
पुनश्चोरीकृतवती नर्मदैषा यथा तथा ॥
आरब्धे मङ्गले कृत्ये रचितोद्वाहमण्डपे ।
सुरभितप्रतिकेदारे मातुरुद्यानमण्डले ॥
शोणभद्रे वरे वाञ्छाविकले समुपस्थिते ।
उपविष्टेऽधिवेदिं च नर्मदाकरयाचके ॥

□

मङ्गलस्नानशुद्धाऽथ याऽवगुण्ठनचञ्चला ।
आनीता श्लक्ष्णनेपथ्या बहुमानपुरस्सरम् ॥
राजिता शोणभद्रस्य पार्श्वे सा वेदिसम्मुखम् ।
पटं संहृत्य सहसा वरं दृष्टवती वधूः ॥
कोपाटोपघटाच्छन्नवक्त्रभ्रूभङ्गवीक्षितम् ।
प्राह सा नैव नैवाहं परिणेष्ये जनं त्विमम् ॥
असरच्च तथा प्रत्यङ् दुर्निवारगतिर्द्रुतम् ।
चमत्कृता यथा धेनू रज्जुच्छेदपलायिता ॥
किं क्रियेत वधूरेव कुसृति कृतवत्यहो ।
इत्याहुर्ज्ञातयः, सा च वधूर्नैवानिवर्तत ॥

[२]

अवाङ्मुखोऽवहन्नभ्रः शोणभद्रोऽथ पूर्वतः ।
यथा स्खलितवीर्यः स्यान्न्यक्कृतो निष्प्रभो जनः ॥
दुर्गमोपलसङ्कीर्णेष्वधोऽधः सरन् शनैः ।
उच्छ्रायेषु शिरः स्वीयमास्फाल्यास्फाल्य सीदति ॥
अधःस्थिता महावृक्षा उन्नमय्य शिरांसि ते ।
पश्यन्त्यधः स्खलन्तं तं शोणभद्रं महावने ॥

□

विकलं च सृता वाताः शीतलं निःश्वसन्त्यधः ।
संवाहयन्तस्तं भद्रं शोणभद्रं मुहुर्मुहुः ॥
भद्र मा चिन्तयाऽभूः कृश इत्याह कूजितैः ।
कान्तारः केशराशि स्वं धुनानो जटिलं जटी ॥
कशाघातैर्हयः कश्चित् सारयन्निव केसरान् ॥
शोणभद्रेण सम्प्राप्ता मैत्री चैषां च सङ्गतिः ।
अपहस्ततसङ्गाया नर्मदाया करस्तु नो ॥

□

२८. सती

परवशत्वमलप्रतिदूषिता
यमगृहं गमितुं च विभूषिता ।
असति सत्यनयक्रमविक्रमे
सपदि मानवता क्रियते 'सती' ।

अयमहो श्रुतिशास्त्रविशारदः
नियमितः स्वमठे हठपूर्वकम् ।
वदति 'शङ्करं' एष भयङ्करं
वचनमग्निसमं बहुपुष्पितम् ।।

किसलयावृतपुष्पविहासिनी ।
नववसन्तसमागमशंसिनी ।
मृदुलिता लतिका बत कारिता
गतघृणं बलवच्च किमग्निसात् ।।

चिरविलम्बिकुरीतिकलङ्कितो
दुरितदुर्नयदानवदीपितः ।
दहति रूपमहो चलितेन्धन-
प्रचयघस्मरपावक एष सः ।।

परगृहं किल शैशव एव या
सरलमुग्धमना बत नीयते ।
परमनिर्घृणमत्र च ताड्यते
धनजिघृक्षुतया बत हन्यते ।।

कथय शास्त्रमिदं खलु कीदृशं
मतिरियं पुरुषार्थमयी च का ।
यदिह सौनिकघातमियं हता
स्वगृह एव यथा हि शकुन्तिका ।।

यदि सती स्वयमेव निजां तनुं
हुतवहे ऽ र्पयतीह शुचाकुला ।
इयमहो अपरैव विडम्बना
कृपणतां गमिता खलु कैरियम् ।।

पतिदिवङ्गमनेन गतार्थतां
गतमहो घृणितं मम जीवनम् ।
इति समर्थयते खलु येन सा
व्रजतु शास्त्रमिदं तु रसातलम् ।।

□

२८. सरस्वती

'भारतीया हृता हन्त गौरण्डैः सा सरस्वती ।
भोजराजेन देवेन गौरवं प्रापिता पुरा ॥

विद्यते लण्डनस्थे सा त्विदानीं सङ्ग्रहालये ।
अस्माकं च परिध्वस्तो गौरवस्यालयो महान् ।'

दम्भोलिघटितैः शब्दैः श्रीदामोदरपण्डितः ।
इत्थं सदसि गर्जन् स सभामालोडयन्मुहुः ॥

विषण्णा चैव विक्षुब्धा संसदश्रुमुखी बभौ ।
सरस्वतीं समानेतुं सङ्कल्पं विदधे च सा ॥

प्रस्तावे पारिते तस्मिन्नासीत् करतलध्वनिः ।
श्रुत्वा तं तुमुलं शब्दं स्मयमानाच्छलेखया ।

जनतायां राजमाना मानसे मानसे शुभा ।
हंसासीना च देवी सा विजहास सरस्वती ॥

□

३०. ढपोलशङ्खाष्टकम्

सुधावदातोऽप्यसुदारणोऽसा—
वापातरम्यश्च मलीमसान्तः ।
बाह्यकशुक्लोऽन्तसि चातिकृष्णो ।
ढपोलशङ्खो विनदन् विभाति ॥

सर्वातिरिक्तोऽपि सदैव रिक्तो
नीरन्ध्रदृश्योऽपि सरन्ध्र एव ।
छिद्रं स्वकीयं विनिगूह्य सोयं
छिद्रं परस्य प्रकटीचकार ॥

न तत्र वीणा क्वणते न तन्त्री
गन्त्री विपञ्च्याः स्वरमालिका नो ।
कुतोऽथ वंशी खलु वादिता स्यात्
प्रध्माप्यते यत्र ढपोलशङ्खः ॥

पुंस्कोकिलः काकलिगानमेतद्
विस्मृत्य तिष्ठेन्निभृतं चकोरः ।
मूकाः कुरङ्गाः स्तिमिताश्च भृङ्गा
ढपोलशङ्खो यदि रारटीति ॥

न पश्यति ह्येष सुदृश्यरूपं
शृणोति नैव श्रवणीयशब्दम् ।
जोगुज्जयन् फूत्कभरैस्तु विश्वं
ढपोलशङ्खो महिमानमेति ॥

जडो जले वर्धित एष शङ्खः
क्षुद्रस्य कीटस्य विकारभूत ।
उल्लोलवीचीचलनेऽप्यलोलो
गोलो ढपोलो विकसत्कपोलः ॥

उच्छिष्ट ओष्ठैरविशिष्ट एष
समुज्झितः शिष्टजनैर्लघिष्ठः ।
अन्यस्य फूत्कारभरेण गर्जन्
ढपोलशङ्खो ऽजनि नादशूरः ॥

उच्चैः प्राप्य पदं विमर्दितसभं सिंहासनं राजते
श्वेतस्फीतपटावृतः सुपुरुषः शुभ्राकृतिः पूज्यते ।
निःश्वासोच्छ्वसितः परस्य नितरांक्लिश्नाति प्राणांश्चय—
स्तस्मै व्यर्थकदर्थिताय च नमः श्रीमद्ढपोलाय मे ॥

□

३१. शुभ्रशङ्खाष्टकम्

अन्तर्निगूढान् स्वपरम्पराया
उपांशुजप्याञ् छतशः शताब्दैः ।
अनाहतांस्तान् ध्रुवमेव नादाञ्—
जोगुञ्जयन्नस्म्यवदातशङ्खः॥

धन्येन केनाप्यधरे धियेऽहं
यज्ञे विवाहे शुभकार्यजाते ।
संस्थापितो मन्दिरगर्भमध्ये
शोभे यथा कश्चन देवदूतः ॥

ममैव घोषैः परिपूरितं सन्
नादात्मकं विश्वमिदं विभाति ।
ममैव शब्दैः खलु सिच्यमाना
तरङ्गिता भाति धराऽखिलैषा ॥

समित्सु शक्तैः परिवादितोऽहं
तत्प्राणशक्तिं प्रगुणीकरोमि ।
वीरेण वीर्येण समर्जिता या
कीर्तिं सितां तां विततां दधामि ॥

क्वचित् पाञ्चजन्ये क्वचिद् देवदत्ते
क्वचिद् भीमरूपे च पौण्ड्रे विशाले
मदीयाः स्वरा एव कामं जुगुञ्जु-
र्महाभारतीये समिद्धे च युद्धे ॥

श्रुत्वैव घोषं मम कोऽपि जोषं
स्थातुं न शक्नोति मनस्विलोकः ।
मदीयनादेन तु मानवानां
झङ्कारिता हृद्गततन्त्रयः स्युः ॥

कर्पूरगौरत्वमनिन्द्यरूपं
सा शुभ्रता वा नवमालिकायाः ।
मुग्धस्य बालस्य च रम्यहासो
ममैव रूपेण लसन्त्यजस्रम् ॥

कैलाससानौ चिरसञ्चितोऽहं
विद्येऽट्टहासः किल शङ्करस्य ।
अनश्वरो निष्कलुषः पुराणश्
चात्मा तु जन्तोरिव चाहमस्मि ॥

□

३२. स्तवमाला

नमस्तुभ्यं नेतृवर्य यत्कण्ठः पुष्करायते ।
मदाभोगघनध्वाने राजनीतिकताण्डवे ॥
निरुपादानसम्भारमभित्तावेव तन्वते ।
चित्रमाश्वासनं चित्रं कलाश्लाघ्याय ते नमः ॥

चरिते दुरिते तथ्ये सुतथे वितथे तथा ।
व्यामिश्रणेव वचसा बुद्धिं मोहयते नमः ॥
वाग्विकल्पघटाच्छन्नच्छटां छादयते क्षणात् ।
मठाधीश हठाधीश जटाधीश नमोस्तुते ॥

प्रवदन् पुष्पितां वाचं श्रुतिस्मृतीरुदाहरन् ।
हिरण्मयेन पात्रेण सत्यं सञ्छादयंस्तथा ॥
निस्सारं भाषणे जल्पन् संसारं समकालिकम् ।
तस्मिंश्चेतसि लिप्तोऽसौ वेदान्ती वन्द्यते मया ॥

प्रसन्नं गद्गदं येऽमी मुकुलीकृतलोचनाः ।
यान्ति गड्डारिकान्यायं नमस्तेभ्यो नमोनमः ॥
हततर्काः क्षतप्रश्नाः शङ्कातीताश्च ये बुधाः ।
अनुधावन्ति निश्चिन्तं रूढिमस्तङ्गतामपि ॥

भूयो भूयश्च वन्दे तान् पुरस्तात् पृष्ठतस्तथा ।
सामीप्यादपि तान् वन्दे वन्दे तांश्चातिदूरतः ॥

□

३३. धर्माचार्यः -१

निनिन्द प्रातरुत्थाय धर्माचार्यो भृशं रुषा ।
जृम्भाविदीर्णवक्त्रेण कालिदासं स गालिभिः ॥

अहो बत दशा केयं कालस्याथ समागता ।
कालिदाससदृक्षो यत् कुकविः पाठ्यतेऽधुना ॥

अयमेव हि हेतुर्यद् विक्रियन्तेऽद्य बुद्धयः ।
यूनामाधुनिकानां च बालानां नव्यशिक्षया ॥

अश्लीलो ऽसौ कविस्तस्य काव्यपाठात् प्रजायते ।
कामक्रीडा—दुराचारः शिक्षासंस्थास्वहो भृशम् ।?

कालिदासो निषेद्धव्यः पाठ्यचर्यासु सर्वथा ।
इति सम्बोधयन् शिष्यं शिवनाम तथा जपन् ॥

स्नात्वा ध्यात्वा महात्माऽसौ व्याख्यानाय सभां गतः ।
मञ्चारूढश्च मालाभिः संस्कृतो हर्षनिर्भरः ॥

तत्र त्वरितमाचष्ट धर्मस्य त्वरितां गतिम् ।
दृष्टिं स्वां त्वरितां नारीमण्डलं प्रति लम्भयन् ॥

बाला सम्मुखमासीना नव्यवेशविभूषिता ।
भूयो जहार तद्दृष्टिं समुपारूढयौवना ॥

तस्याः पीनस्तनौ दृष्ट्वा शिरः कम्पयते स्म सः ।
तयोरन्तरसंलग्नां दृष्टिमुत्पाटयन्निव ।।

सभायां च समाप्तायां स्थले निर्मक्षिकेऽथ सः ।
प्राह शिष्यमहो शान्तं पापं दौस्थ्यं न सह्यते ।।
सम्मुखस्थितबालाया किं कुचौ लक्षितौ त्वया ।
कुञ्चितं कञ्चुकं तस्या भित्वेव बहिरागतौ ? ।।

अहो महानयं घोरः कलिकाल उपागतः ।
नारीणां भूषणं लज्जा धिक् तदेव निरस्यते ।।

कालिदासप्रभावोऽयं काल एवायमीदृशः ।
सतीत्वं कुत्र यातं तत् स्त्रीणां धर्म क्व वा गतः ? ।।

सुवृत्तं पदमेतासां हृदयेषु न लब्धवत् ।
दर्शयन्त्यत एवैताः सुवृत्तं कुचमण्डलम् ।।

निनिन्द रूपं धर्मात्मा स महात्माऽथ वेदवित् ।
कालिदासस्य काव्यं च भूयो भूयो निनिन्द सः ।।

निन्दां कृत्वा च बहुशो भोजनाय पुनर्गतः ।
नगरश्रेष्ठिनो गेहं पूर्वं यत्र निमन्त्रितः ।।

साध्वीं रसवतीं तत्र साध्वी रसवती वधूः ।
विनम्रा विनता नम्रा परिवेषयति स्म सा ।।

उत्तानितत्रिकं भङ्ग्या क्वणद्वलयपाणिना ।
मादकं स्थापितवती श्रद्धया साग्रहं यदा ।

स्थाल्यां महात्मना दृष्टं स्थापितं कुचयुग्मकम् ।
प्रशशंस महात्माऽसौ कृतं सुस्वादु भोजनम् ।

भोजनं चैव सम्पाद्य विश्राम्यति स्म तत्र सः।
अतिवाह्य दिनं चैवं रात्रौ स्वप्तुं समुद्यतः॥

ददौ भूयो महात्मासौ तन्द्राकीलित जिह्वया।
कालिदासाय गालिं च सुखं सुष्वाप धर्मवित्॥

□

३४. धर्माचार्यः -२

शुभ्रे सिंहासने हेम्ना मण्डिते राजते शुभे ।
विन्यस्तपादपीठेऽस्मिन् धर्माचार्यो निषीदति ॥

आलोकशब्दविज्ञप्तः स्वस्तिवाचनसत्कृतः ।
चामरैर्वीजितो नित्यं धर्माचार्यो महीयते ॥

सन्ति सन्तः कियन्तस्ते श्रद्धाभक्तिसमन्विताः ।
अहम्पूर्विकया नित्यं मम पादौ स्पृशन्ति ये ॥

इति पश्यन् स्वपादस्य वन्दनाद्धर्मसुस्थितिम् ।
भावयन् मुदितो नित्यं धर्माचार्यः प्रसीदति ॥

तथाकथितधर्मस्य कन्थां जर्जरतां गताम् ।
धारयन्नात्मना तुष्टो धर्माचार्यः सुखीयति ॥

अहो महान् सतीधर्मो शासनेन विरुध्यते ।
निषिध्यते च विधिना कोऽयं कालः समागतः ॥

सतीदाहप्रचाराय प्राणानपि ददाम्यहम् ।
इति घोषणया सार्धं धर्माचार्यः प्रकुप्यति ॥

समस्यानां समाधानं सर्वासामेतदेव हि ।
पत्नी दहतु स्वं देहं स्वपत्युर्मरणान्तरम् ॥

यत्र नार्यस्तु दह्यन्ते रमन्ते तत्र देवताः ।
अन्नं जलं बलं राष्ट्रे सतीदाहेन जायते ॥

ऊर्ध्वबाहुर्विरौम्येष नहि कश्चिच्छृणोति माम् ।
धर्मस्य तत्त्वं जानामि सतीदाहेन तद्भवेत् ॥

इति विज्ञापयन् लोकान् विज्ञैर्निर्भर्त्सितोऽपि सन् ।
गतिं कालस्य नो जानन् धर्माचार्यो विषीदति ॥

□

३५. समस्यापूर्त्तयः

[१]

अश्नंस्तृणानि विचरन् बहुघासरम्ये
क्षेत्रे खरं बहुल-'ढेञ्चु'-रवं वितन्वन् ।
सन्तुष्ट एष परिचिन्तयते खरो यत्—
'कालो ह्ययं निरवधिर्विपुला च पृथ्वी ।।'

'मच्चे मुहुर्नदति भाषणतुष्टचेताः
साम्राज्यमेव मम सर्वमहं विजेता'—
इत्थं मनस्यविरतं कुरुते च नेता—
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ।।'

आयुः परिस्रवति हस्तगृहीततोयं
स्थास्नुर्भविष्यति जगत्यचलोऽपि कोऽयम् ।
श्वासावकाश इह दुर्लभ एव किं स्यात् –
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ।।

[२]

अक्षुण्णमेतद्धृदि पारतन्त्र्यं
रूपे विचारे व्यवहारजाते ।

'स्वप्नो नु माया नु मतिभ्रमो नु'
स्वातन्त्र्यमेतद् यदवाप देशः ।।
दारिद्र्य-रोगं किल लोपयामो
वृत्तिं समेषामिह कल्पयामः ।
इत्थं वदद्भिर्बहु वाहितास्ते-
'मनोरथानामतटप्रपाताः ।।'
'असन्निवृत्यै तदतीतमेव'
यद् गान्धिना स्थापितमत्र सत्यम् ।
'टोपी' च तन्नाममयी धृता या
नेत्रा विदूरीक्रियतेऽद्य सापि ।।
क्लिष्टं नु तावत् फलमेव पुण्यं'
सर्वाणि यातानि शुभानि वा किम् ? ।
देशस्य दैन्ये दिवसावसाने
छायेव लीना खलु संस्कृतिः सा ।।

[३]

एतत् कुरु प्रविकलं प्रविचाल्यमानं
सिंहासनं 'स्थिरतया विहितानुबन्धम् ।'
'अस्मिन्नलक्षितनतोन्नतभूमिभागे
'टोपी' समुच्छलति भोस्तव मूर्ध्नि नेतः ! ।।
रीतिं जहीहि रसभावमयीं पुराणीं
शय्यां च मुञ्च ननु पाकमपाकुरुष्व ।
काले कवेऽतिविकले नवकाव्यरम्ये—
मार्गे पदानि खलु ते विषमीभवन्ति' ।।

[४]

नो मासो मधुरस्ति सन्ति न पुनस्ता एव चैत्रक्षपा
नो वाताः प्रवहन्ति हन्ति न मनः पुष्पं प्रवालोपमम् ।
नाहं सोऽस्मि तथाप्यसंस्तुतधिया स्वैरं प्रवृत्तं यथा
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।।

[५]

यात्येकतोऽस्तशिखरं पतिरोषधीना-
मा विष्कृतारुणपुरस्सर एकतोऽर्कः ।
कालेन कन्दुकनिभौ चरणप्रहारैः
क्षिप्तावुभौ भुवि यथा शिशुनेव खेले ॥

□

३६. अन्योक्ती

[१]

घट्टोऽयं नवयोगमाप, सुदिने राज्ञा समुद्घाटितः
सा सोपानपरम्परापि विहिता रम्या पुनः स्फाटिकी ।
स्वच्छं सर्वमपीह शोधितचरं स्थानं विधानेन यत्
क्रीडोद्यानमिह प्रकल्पितमिदं निर्मापितं मन्दिरम् ॥

"आयाहीह रमस्व वा कुरु सखे स्वैरं विहारं मुदा
भक्तिश्चेत् परमेश्वरे, शिवगृहे पूजार्चनां वा कृथाः ।
तीरे वा सरितो दिनं विगमय, स्थित्वा समुच्छ्वस्यताम्"
'नद्यां वारि तु नास्ति"–"तेन किमिह च्छिन्नं शुचं मा गमः ॥"

"पानीयं यदि नास्ति शून्यमिह तत् सर्वं भवेद् घट्टके
मुक्ता-मानस-शुक्तिका अपि हताः पानीयमप्राप्य यत् ।"
"रिक्तं घट्टमवाप्य सीदसि वृथा, शोकं सखे मा कृथाः
आनेतुं जलमत्र कापि बृहती सा योजना कल्पिता ॥"

[२]

कान्तारा अधुना न सन्ति येषु निनदेद् राजा स पञ्चाननः
चीत्कारं क्व मदातिरेकगुरुकं कुर्वन्तु ते दिग्गजाः ।
रात्रौ किन्तु पुरे प्रसुप्तभुवने विश्रान्तकोलाहले
क्वापि क्वापि सुदूरतो विदधते तीव्रान् रवान् फेरवाः ॥

□

३

लहरीलीलायितम्

३७. धरित्रीदर्शनलहरी

प्रथम उन्मेषः

कश्चिद् यात्रापरिगतरुचिर्भारते पान्थ आसीद्
विश्वस्मिन् यो भ्रमणरसिको द्रष्टुमुत्को धरित्रीम् ।
प्राच्याधीतौ कलितरुचितो दिष्टयोगं नियोगं
लेभे गन्तुं प्रथितसुभगं प्राच्यशर्मण्यदेशम् ॥१

दूराद् देशाद् बहु नवविधं क्रीडनार्हं सुरम्यं
क्रीत्वाऽस्मभ्यं निजनिलयकं तात सद्यः समेयाः ।
इत्थं सोत्कः प्रणयनुदितो डिम्भकैरुत्सुकैः स्वै-
र्दारान् बाष्पाकुलितनयनान् सान्त्वयामास धीरः ॥२

देशाद् गन्तुं बहिरपि तथा पारपत्रं स लेभे
दूतावासात् सपदि वृतवान् सुप्रवेशाधिकारम् ।
भार्यां बालान् सुहृद इतरान् मङ्गलं भाषमाणा-
नापृच्छ्यासौ नियतदिवसे प्रस्थितः स्वीयगेहात् ॥३

अन्ताराष्ट्रं तलमतुलितं देहलीस्थं यथाहं
भव्यं भूमौ विपुलभवनं प्राप वैमानिकं सः ।
सद्यो दिव्यान् कुतुककलितो विस्मितस्तत्र दृष्ट्वा
भावांस्तांस्तान् लसितविभवान् व्यस्मरत् स्वानभावान्॥४

कृत्वा पूर्णं विहितविधिना तं च यात्रोपचारं
शालामन्तः प्रचुरविशदां स प्रविष्टो विशालाम् ।
आसीनोऽत्र स्थितमधितलं सम्मुखीनं विमानं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥५

आरूढश्च प्रमुदितमनाः प्रेर्यमाणं विमानं
स्थानं नीतः श्रमविगमकं यानबालाप्रदिष्टम् ।
यानाध्यक्षो गमनसमयं चाथ सङ्क्षोप्य यातॄन्
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥६

रिङ्गन् रिङ्गन् वलयपरिधौ भूमिभागे विमानः
स्थानात् तस्मादुपरि सहसैवोत्थितश्चान्तरिक्षे ।
क्रान्त्वा भूमिं प्रगुणितरयो भूय एवोन्मुखः खे
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥७

गत्वा चोर्ध्वं वियति विपुलेऽसौ विमानो ललम्बे
निःस्तब्धत्वं गत इव यथा विस्मृतश्वास आसीत् ।
नो संसर्पन् नियतगमनः पृष्ठतश्चाग्रतो वा
विश्वामित्रप्रतिहतरयः सम्पतन् वा त्रिशङ्कुः ॥८

उड्डीनः किं वियति सहसा पक्षिराजो गरुत्मान्
पार्श्वाभ्यां सोऽतिविततती पक्षती सम्प्रसार्य ।
भूगोले वा भ्रमति विपुले पूरुषश्चोर्ध्वमूर्ध्वं
वृत्वा भूमिं स्थित इव च तां सर्वतः क्रम्यमाणाम् ॥९

नीचैरासीत् तरलसलिलं गाहमाना धरित्री
पान्थो धीरस्तिमितनयनस्तां गवाक्षादपश्यत् ।
तूर्णं चित्तं समभवदहो भावचैचित्र्यपूर्णं
तेनात्मानं मुदितमनसा स्वात्मनैवाबभाषे ॥१०

यस्यां गीतं हसितमनिशं क्रीडितं नृत्तमासीत्
यस्यां ते ते मुदितहृदया उत्सवा योजिताश्च ।
दूरे संस्था निकटमिह सा भासते भास्वतीव
स्वेष्टस्येवच्छविरुपनता साक्षिभास्यस्वरूपा ॥११

द्वितीय उन्मेषः

शुभ्रा स्वच्छा हिमकणततिर्दृश्यते या विमानात्
कीर्णा नीचैरुपरि परितश्छाद्यमाना समन्तात्।
पश्याम्येनां रजतसदृशीं राजमानां मनोज्ञां
भक्तिच्छैदैरिव विरचितां भूतिमङ्गे धरित्र्याः ॥१

यद्वाः दृष्टं वियति मनुजैर्वस्तु यद् विप्रकृष्टं
नीचैः संस्थं न खलु विततं वर्तते तादृशं तत्।
नानारूपैः प्रकटयति नः सान्यथाकृत्य सृष्टिं
स्वोन्मेषैस्तैः कविकुलगुरोस्तस्य चैकस्य दृष्टिः ॥२

एषा शेते ह्यलसलुलिता क्लिन्नगात्रीव शीते
प्रच्छाद्य स्वां शिथिलिततनुं तूललेशैर्धरित्री।
जाड्याधिक्यादतिहिमजडा ग्लप्यमानातिदीना
जाता मन्ये शिशिरमथिता पद्मिनी वान्यरूपा ॥३

निर्वाते किं वियति विपुले विश्वनीडो ललम्बे
निःस्पन्दत्वं कथमिह गतश्चायमोको जनानाम्।
पश्याम्येनां निभृतनिभृतां म्लानगात्रीं धरित्रीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥४

शब्दाख्येयं यदपि किल तद् वस्तुजातं समग्रं
लोके, लोक्यं विविधकलया रोचनैर्लोचनैर्वा।
आयत्तं तत् कथमिह भवेन्नूतनैः स्वीयशब्दै
र्मन्दाक्रान्ता कविकुलगुरो सज्जते यत्तु चित्ते ॥५

स्यूतं स्यूतं पुनरपि च यच्छीर्यते धार्यमाणं
गात्रे क्लृप्तं कथमपि तथाऽऽच्छादने तालमेव।
धृत्वा देहे हिममयमिदं श्वेतकार्पासवस्त्रं
पृथ्वी चास्ते विकलकरणा निर्धना गेहिनीव ॥६

चक्रः किं वा भ्रमति विततः कालकौलालनुन्नो
न्यस्तः पिण्डो लघुरिव मृदः पर्वतो भाति मध्ये ।
दृष्टा पृथ्वी भ्रमितविधुराऽलातचक्रप्रभेषा
सिन्धुर्बिन्दुर्भवति विताता दीर्घिका चाप्यदीर्घा ॥७

अन्तं यातः शिशिरसमयो नो हिमानी व्यपेता
आर्त्ता जाता धरणिरिह किं कालवैकल्यभावात् ।
सैवानन्या सहजसुलभा विद्यतेऽस्यास्तितिक्षा
सोऽपि स्नेहः शिशुजनगतः सैव चास्याः प्रतीक्षा ॥८

औदार्यं तद् विकटपृथुला रम्यता सैव तद्वत्
सैवैषाऽस्ते धृतिगतिमती मातृरूपा धरित्री ।
पश्यन्नेतां परित इव तां देवतां मन्दिरस्थां
ध्यायं ध्यायं मुदमनुपमां व्योमपान्थो जगाम ॥९

सर्वं देव्या अतुलितकथं वन्द्यहृद्यस्वरूपं
साक्षाद् दृष्ट्वा चकितमनसा चिन्तयामास पान्थः ।
किं नोऽजानां प्रतिशिशुजनं प्रेम विश्वम्भराया
अस्या अङ्के मृदुलपृथुले यापयन् दीर्घकालम् ॥१०

बीजं प्रेम्णो निहितमभवद् यद्धि चित्तेऽप्ररूढं
शुष्के क्षेत्रे सलिलपतनोदभिन्नमासीत् तदानीम् ।
चित्ते स्वीये विगलनकरी भावना तेन तेने
स्वेष्टे वस्तुन्युपचितरसा प्रेमराशीभवन्ती ॥११

तृतीय उन्मेषः

आयातैषा ह्यविदितगतिर्यामिनी रुद्धयामा
नो वा तारा इह विकसिताश्चन्द्रमा नैव दृष्टः ।
अन्तर्धानं नभसि तु गते कज्जलैः कीर्यमाणे
ध्वान्तव्यूहं प्रविशति शनैर्दृष्टिहीनो विमानः ॥१

दर्शं दर्शं परित इव तान् व्योम-यातून् विमाने
नाना-भाषाप्रकृतिसहितान् साम्यवैषम्ययुक्तान् ।
स्वात्मानं, तन्नियतिनटनं मानवेच्छापरीतं
लोकं पश्यन्, कुतुककलया कीलितोऽभूत् स पान्थः ॥२

अग्रे संस्थो नर इह मनाक् कूणितस्कन्धदेशः
पेयं गृह्णंश्चषकलुलितं व्योमबालाग्रहस्तात् ।
स्वादुङ्कारं कटुरससुरां 'स्काच'-नाम्नीं तथान्यां
शैम्पेनाख्यां मधुरमदिरां मोदते स्वप्नमूढः ॥३

स्वप्ने पश्यन् भ्रमिषु वलितं श्रोणियुग्मं स्वकीर्त्ते-
स्तृप्तो दृप्तो विनयविरहात् स्वाधिकारप्रमत्तः ।
कर्त्ता धाता निखिलजगतश्चैक एवास्मि धीमा-
नित्थं चेतः स्मयमदमयं सैष मूढः करोति ॥४

पृष्ठे संस्थो जन इह तथा मेदुरश्यामवर्णः
केशाग्रैः स्वैः परमकुटिलो नो मनाङ् मानसेऽसौ ।
'नामीबीयां' पर-कर-धृतां धर्षितां राष्ट्रलक्ष्मीं
ध्यायन् स्वीयां, व्यपगतरतिर्विक्लवत्वं प्रयाति ॥५

कस्मिन् देशे सकलविभवे लब्धजन्माऽसि भद्र !
पृष्टश्चेत्थं निगदति यदा देशनाम त्वरार्त्तः ।
वाष्पस्तब्धः कलुषनयनो जोषमास्थाय तोषं
स्तोकं चैवं प्रणयविधुरो नाश्नुते पारतन्त्र्यात् ॥६

स्नायुष्वस्य प्रवहति परं शोणितं शोणमारा-
दस्याप्येतद् हृदयमनिशं विद्यते स्पन्दमानम् ।
भाले ऽस्यैषा लिपिरिह तु या ऽलेखि धात्रा प्रशस्ते
धिक्कृत्यैनां प्रभवति तथोद्धर्तुमात्मानमेषः ॥७

कालज्वालामुखमुखरिता ये व्रणाङ्कास्त्वदीया
हृन्मर्मान्तिस्तरलहृदये सादयन्तः सदा त्वाम् ।
स्फोटस्तेषां भवति नु कदा भूतधात्रि त्वदीयं
यो वै तापं शमयति गिलन् किल्विषं भारभूतम् ॥८

यद्वा सर्वं सहस इति ते नाम सर्वंसहेति
पापाचाराः कति कतिविधाः किं भवत्या न सोढाः ।
क्षान्तिः क्षमे ते क्षणमपि मनाक् प्राप्नुते नैव लोपं
माता वा स्यात् कुतनयजनैः किं कदाचित् कुमाता ?९

स्वार्थान्धैस्तैः क्षपितकरुणैर्नीयमानाभ्रगर्त्तं
कैश्चित् सद्भिर्ध्रियत इह वा धार्यमाणा धरैषा ।
इत्थं चिन्तातिभिरधिकं घूर्णमानस्य तस्य
स्थित्वा यानेऽनिमिषमनिशं रात्रिरेव व्यरंसीत् ॥१०

सायङ्काले स्वयमुपगतं गूढमङ्के धराया
आश्लिष्यैनां क्वचिदपि निशामाशयानं प्रगल्भम् ।
प्राचीतीरे दिनमणिमसौ रश्मिभिः सन्निबद्धं
काष्ठाभिस्तं घटमिव शनैः कृष्यमाणं ददर्श ॥११

चतुर्थ उन्मेषः

संसर्पन्ती सलिलतरला शुभ्रवर्णाभ्रमाला
सीम्नो रेखां विरचितवती स्वर्भुवोर्मध्यदेशे ।
सूर्यालोके गगनसरणौ स्यन्दमाने विमाने
तस्याधस्तात् सपदि वसुधां तूलकल्पा न्यरुन्ध ॥१

आस्तीर्णैषा परिवहपथे मेघमालावदाता
सञ्छाद्यैनां धरणिमिह किं पाण्डुशुभ्रैर्दुकूलैः ।
उड्डीयन्ते पवनचपलाः किन्नु पट्टांशुकानां
श्वेतस्निग्धा दिशि दिशि सृतास्तोरणालोलमालाः ॥२

पारावारः स्वयमुपगतः प्लावयित्वा द्युलोकं
पूरे क्वास्ते त्रुटितपुलिना लोयमाना धरित्री ।
मेघालीं तां प्रविशति शनैः पारयिष्णुर्विमानो
गामुन्नेतुं विशति वदनं किं वराहस्य विष्णो ॥३

किं सञ्जातः सघनतिमिरे पूर्णिमायाः प्रकाशः
स्फीतं किं वा प्रवहति तथा दुग्धकुल्यासहस्रम् ।
नीचैरेषा धवलधवला लक्ष्यते मेघमाला
राशीभूतः प्रसृत इव किं त्र्यम्बकस्याट्टहासः ॥४

किं क्षीराब्धेरुपरि च शनैः स्यन्दमानेव नौका
राशेराहो ह्युपरि यशसां धूयमाना पताका ।
मेघानां स क्षितिजपुलिनादास्तृतायां विमानो
मध्ये गच्छन् रवविरहितो लक्ष्यते कृष्यमाणः ॥५

आकाशः किं पवनशकलैर्मथ्यते दिग्वधूभि-
र्मेघा नैते दधिमथनतः कृष्टगव्यं सुनव्यम् ।
क्षीराब्धेर्वा मथनसमये फेनपुञ्जः समुत्थो
द्यावाभूम्योः प्रसरति बहु क्षिप्यमाण समन्तात् ॥६

बालः कूर्दन्नटति मुदिरप्राङ्गणे वारणास्य-
स्तिष्ठत्यग्रे क्वचिदिह च वा मेघपङ्क्तौ विडौजाः ।
लीनः क्रोऽतिसघनघनाडम्बरे शम्बर किं
चेतस्यासीदिति सुविततं मेघमालोक्य तस्य ॥७

पत्राण्येतान्यमितविततान्यालये ब्रह्मणो वा
नित्यं येषामुपरि कवितां किं पुराणः कविः सः ।
या नो जीर्येल्लिखति नवलामक्षतां दिव्यवाचा
पत्रे पत्रे कनकखचितं तद्धि देवस्य काव्यम् ॥८

अभ्रं छिन्नं क्षणमिह पुनर्भूतधात्री तथाऽसा-
वालोके मे निपतति शनैर्निम्नगेव स्खलन्ती ।
यद् वा भूमिः सिचयपटलं सन्निरस्य क्षणं सा
भृङ्गप्रायं प्रहसितवती वीक्षमाणा विमानम् ॥९

छिन्नादभ्रात् किमिह खलु तद् दृश्यते गर्त्तरूपं
गर्त्तो नासौ तरलसलिलं सागरस्यैव नूनम् ।
नीले तस्मिंस्तरति सलिले मत्स्यरूपं नु किञ्चि-
न्नौका नूनं भवति ननु सा मन्थर स्यन्दमाना ॥१०

नीचैरेषा प्रगुणितगतिर्याति नौका विशाला
याति स्वैरं नभसि विततेे चोर्ध्वमस्मद्विमानः ।
मन्ये चाब्धेः पयसि वसुधाचेतसीव प्रसन्ने
छायात्मास्य प्रकृतिसुभगो विन्दते द्राक् प्रवेशम् ॥११

पञ्चम उन्मेषः

साक्षात्कृत्य प्रणयमुदितो भूतधात्र्या दविष्ठं
वैभ्राजं तद् विततमखिलं दृश्यमालेख्यकल्पम् ।
नीत्वा बिम्बं हृदयपरिधिं प्रत्यभिज्ञाप्रतीतं
संसारं तन्निहितमखिलं विश्वरूपे ददर्श ॥१

'एते प्राप्ता ननु वसुमतीं सावधाना भवन्तः
सन्तिष्ठेरन्, भवतु भवतां मङ्गला चैव यात्रा' ।
यानाध्यक्षो मुदितमनसा घोषयामास चेत्थं
प्रह्वीकुर्वन् सपदि वसुधां नीयमानं विमानम् ॥२

सूर्येणाभाकलितमधुरं रश्मिभी रञ्जिताया
नीचैर्यास्यन्नमितवदनो मेघसोपानपङ्क्तेः ।
आविद्धोऽसौ भवति सघनैरभ्रखण्डैरदभ्रं
भूमीदेव्या हृदयकरुणासान्द्रनिःश्वासकल्पैः ॥३

आविर्भूते शशिनि तमसा शर्वरीव व्यपेता
नैशस्यार्चिर्हुतभुज इवापेतधूमाग्रपुञ्जा ।
दूराद् दृष्टा निकटनिकटं भूतधात्री समेता
धेनुः प्राप्ता व्रजमिव यथा वत्समाकारयन्ती ॥४

पृथ्वीपत्रे निपतितमसेर्बिन्दुरेको य आसीत्
सञ्जातोऽसौ सघनविततां वृक्षपङ्क्तिर्वनान्याः ।
भूम्या हस्ते चुलुकविधृतं यज्जलं दृश्यते स्म
पश्चाद् दृष्टः सृत इव पटः, सागरस्तद् बभूव ॥५

आयाता सा जलधिरशना भूतधात्री समीपं
माता स्नेहप्रचितहृदया चार्बुदानां जनानाम् ।
अक्षय्यान्तर्हितनिधिततिस्तप्तहेमप्रभाभ्यां
वक्षोजाभ्यां सुमधुरपयः पाययन्ती तनूजान् ॥६

भास्वद्भानोः प्रविततनभोमण्डलैस्तैः करायै-
रामृष्टैव प्रतिदिनमसौ बुध्यते त्यक्तनिद्रा ।
अद्याप्येषा भ्रमति भवने भूभर्वन्ती सुभव्या
नूत्नैवास्ते पुनरपि पुनर्जायमाना पुराणी ॥७

एषा शुभ्रां तनुमिह शुभां संविदाना विभाता
स्नाता चोर्ध्वं सरसि रमणी दृष्टये ज्योतिषाऽऽगात् ।
मुञ्चत्यस्या अलकनिचयश्चूर्णितां बिन्दुधारां
शष्पश्यामाच्छिखर-निकरात् स्यन्दमानैः प्रपातैः ॥८

धम्मिल्लं स्वं घनवनगतं सस्मितं धुन्वती सा
स्कन्धे धृत्वा हरितहरितं शाद्वलानां दुकूलम् ।
प्रातःकाले जलधिजपयश्चुल्लुके स्वे प्रगृह्य
माताऽऽयाता तनयवदनक्षालनार्थं समीपम् ॥९

यस्यां पूर्वे प्रथितयशसश्चक्रिरे विक्रमांस्ता-
नर्वाचीना विदधति कलाकौशलं ज्ञानसत्रम् ।
सा नः क्षेमं वितरतु धराऽऽराधिता रत्नगर्भा
माता भूमिर्विनततनयः सोऽस्मि चास्या धरित्र्याः ॥१०

इत्थं भूमिं स्वहृदयतले भावयत्येव तस्मिन्
यानं गत्वा धरणिमभितस्तां परिक्रम्य तस्थौ ।
प्रह्वो हृष्टो मनसि बहुशस्तां सुमूर्तिं विचिन्वन्
धीराश्वासः शिरसि पथिको धूलिमस्या दधार ॥११

□

३८. निदाघलहरी

(१)

दाहं दाहमयं लोकानीतिभीतीः प्रसारयन् ।
आतङ्कवादिखलवन्निदाघो दाघमश्नुते ॥ १

अभिसन्धिविदीर्णा भूः शोषिता स्नेहवर्जिता ।
शोषितानां जनानां सा मनोभूर्विक्लवा यथा ॥ २

ग्लपयन् रसवर्जं स शोषयन् निखिलाः प्रजाः ।
निदाघो निर्दयं शास्ति क्रूरो भूमिपतिर्यथा ॥ ३

उच्छ्वसन् निःश्वसन् वह्निं दीपयन् सर्वतोमुखम् ।
लौहकारस्य भस्त्रेव लोकः प्रध्माप्यतेऽनिशम् ॥ ४

निष्कृपं स्वकरांस्तीक्ष्णान् प्रक्षिपन्नेष भास्करः ।
अक्षैर्दीव्यत्यहो प्राणैर्जनतायाः पणीकृतैः ॥ ५

(२)

जना अन्नजलाभावाद् भ्रामं भ्रामं दिवङ्गता ।
इरणे तृषिताः क्षीणा भ्राम्यन्तः पशवो यथा ॥ ६

राजस्थाने मृता बालाः पिपासाकुलिता नव ।
तथा गुर्जरदेशेऽपि मृता गावो बुसं विना ॥ ७

गोमाता म्रियते लोका बुसं देयं तृणादिकम् ।
इत्याह्वयति धर्मात्मा नेता चैवानुभाववान् ॥ ८

तृणानां प्रेषयन् राशीर्गोभ्यो यानेन सत्त्वरम् ।
म्रियन्तेऽत्र नराः क्षुद्भ्य इति किं नैव पश्यति ॥ ९

बुभुक्षितः करोत्येव पापानीति वचो वृथा ।
उदरम्भरयः किं किं पापमत्र न कुर्वते ? १०

(३)

यथा तथैव सायासं रक्ष्यते गृहवाटिका ।
गृहिण्याऽलाबुकूष्माण्ड्यौ फलिष्यत इतीप्सया ॥ ११

कुत्र कस्मिन् प्रदेयं स्याज्जलं स्वल्पं तु पादपे ।
रक्षणीयं गृहे वा स्यात् स्नानाय क्षालनाय वा ॥ १२

इति चिन्तातुरा म्लाना गृहिणी वाटिकास्थिता ।
सेचनं कुरुते प्रातर्जलैश्चुलुकमात्रकैः ॥ १३

पिपासाकुलितः पक्षी पयोधानेन सिञ्चतीम् ।
निर्वर्णयति तामुत्कस्तत्क्षणोज्झितपादपाम् ॥ १४

प्रदत्तमञ्जलिप्रायं जलं तूर्णं प्रशुष्यति ।
आलवालमथ प्राप्य पक्षी पश्यति कर्दमम् ॥ १५

(४)

अवस्थानेषु हट्टेषु पिपासापीडिता नराः ।
बम्भ्रामति जलं पातुमन्विष्यन्तः प्रणालकम् ॥ १६

जलमादातुमुत्कानां प्रतीक्षाकुलितात्मनाम् ।
लोकप्रणालके पङ्क्तिः स्त्रीणां दीर्घा प्रजायते ॥ १७

सद्यो जलव्यवस्था स्यादित्याश्वासयति प्रजाम् ।
'मारुतिं' च समारुह्य महापौरः समागतः ॥ १८

सहठं स्वघटं चाग्रे स्थापयन्तीं तु पृष्ठतः ।
कटूक्त्या वारयत्येषा हस्ताहस्तिक्रयाऽथवा ॥ १९
पिपासाकुलितः पान्थोऽधरोष्ठं जिह्वया लिहन् ।
अनादाय जलं याति कलहं वीक्ष्य चानयोः ॥ २०

(५)

दाववह्निः प्रकुरुते खाण्डवे ताण्डवं तथा ।
अर्जुनेनार्जुना दग्धाः शरविद्धा यथाऽखिलाः ॥ २१

करदर्वीः खराश्चैताश्चालयत्यथ भास्करः ।
धरा-महाकटाहेऽस्मिन् भर्जिता मानवा भृशम् ॥ २२

ऐषमो ग्रीष्म एतानि नीध्राणिच्छादितान्यहो ।
आभीरपल्ल्यां गोपालैः श्रमिकैः स्वगृहेषु वा ॥ २३

बभञ्जैतानि झञ्झाभिः प्रबलोऽयं प्रभञ्जनः ।
अद्रिशृङ्गाणि हरते यथा वीरोऽञ्जनासुतः ॥ २४

ज्वलत्यथ धरा शुष्का जीवनं प्रज्ज्वलत्यहो ।
प्रदीप्ते वह्निना गेहे कूपं खनति शासनम् ॥ २५

(६)

श्वसुरालयसम्प्राप्ता पीड्यमाना वधूरिव ।
छायां छायाप्यहो कोणे मार्गमाणा लयं गता ॥ २६

शीतयन्त्रगलत्तापक्षपितातपसद्मसु ।
शेरते विपुलामोदं धनिका अधिकारिणः ॥ २७

धगद्धगज्ज्वलज्ज्वालाजिह्वास्वग्नेर्निरन्तरम् ।
तृषा लपलपं दीप्तमुच्छलन्त्या महाध्वरे ॥ २८

ब्रह्माण्डस्य महावेद्यां भूगोलं याजको रविः ।
आदीप्ताखिलमध्याह्ने जुहोत्याहुतिभिः समम् ॥ २९

तप्तायःपिण्डवद्दीप्ते शून्ये घण्टापथे मुहुः ।
हिमगोलकविक्रेतुराह्वानं विचरत्यहो ॥ ३०

(७)

एतद्घर्मपरिक्लिष्टं सन्ध्यायां तारकाञ्चितम् ।
नभः संलक्ष्यते तापात् स्वेदबिन्दुविचित्रितम् ॥३१

ऊष्मा ग्रीष्मसमुत्तप्तः पिपासाकुलितो भृशम् ।
लेढि स्वेदद्रवस्राव नराणां चर्मणोऽनिशम् ॥३२

धूलिं नेत्रे विनिक्षिप्य झञ्झेयं सान्द्रमर्मरा ।
विहसन्ती विनिर्याता चेत्वरा नर्मकौतुकात् ॥३३

तालपत्रं करे धृत्वा शयानोऽयं गृहाद्बहिः ।
खट्वास्थः स्थविरो वायुं नैव वातीति शप्तवान् ॥३४

अप्रकम्पतृणे काले निर्वातेऽखिलभूतले ।
केवलं पत्रमेकं तत् कम्पतेऽश्वत्थपादपे ॥३५

(८)

अनिशं हृतवन्यश्रीर्नष्टसत्त्वो भयार्दितः ।
खिन्नस्तिष्ठति विन्ध्योऽयं खल्वाटः स्थविरो यथा ॥३६

वृक्षा ऋक्षा वराहाः क्व सिंहा व्याघ्राः मृगा गताः ।
इत्यगस्त्यगतामाशां सोत्कण्ठश्च निरीक्षते ॥३७

आतपस्य स्वर्णराशिं सहस्रैः स्वैः करैः रविः ।
वितरत्यादिनान्तं स च्छत्तीसगढजङ्गले ॥३८

शाखाबाहून् समुत्थाप्य तं च गृह्णन्ति वृक्षकाः ।
अहम्पूर्विकया चैते भिक्षुका इव लोभिताः ॥३९

पल्लवाङ्गुलिविन्यस्तं पतितं तं क्वचित् क्वचित् ।
धरा गृह्णाति साऽत्यल्पं सुवर्णकणमञ्चले ॥४०

(९)

समारूढनभोमञ्चो गर्जन् मेघो न वर्षति ।
भाषमाणोऽक्रियो नेता जनतायाः पुरो यथा ॥४१

द्यामुत्तीर्य विलीयन्ते मेघाश्छलसमन्विताः ।
शुष्को म्लायति केदारः क्षेत्रेषु ग्रामसीमनि ॥४२

काष्ठलोलुपवित्तेशैरवनी चावनीकृता ।
नग्ना दीना न रमते दरिद्रा जनता यथा ॥४३

दुःशासनेन पाञ्चाली कृष्यमाणाञ्चला यथा ।
धरित्री दूयमानास्ते वन्यवस्त्रनिकृन्तनैः ॥४४

मध्याह्ने श्रमिकान् कृत्ये योजयन् कर्षयन् प्रजाः ।
भीष्मो ग्रीष्मः स्थितः क्रूरः पणकृत्[1] कृपणो यथा ॥४५

(१०)

मूर्च्छन्ती कविताधारा पाषाणैर्घट्टते जडैः ।
व्यथते विधुरा चित्ते रचनावचनावली ॥४६

चोरयन्नाननं स्वीयं निःशब्दो निर्गतो द्रुतम् ।
सन्देशप्रापणं मेघो प्रत्यादिशति धाष्ट्यतः ॥४७

कथं सम्भाव्यते वाद्य मेघदूतप्रकल्पनम् ।
शुष्के मरुस्थले वाणी शीर्णा जर्जरतां गता ॥४८

यक्षः प्रतीक्षते कामी कदा मेघः समेष्यति ।
वन्ध्येयं वसुधा कृत्स्ना शापमुक्तिं च काङ्क्षति ॥४९

कुतो यक्षः कुतो मेघः सन्देशप्रापणं कुतः ।
विच्छिन्नाभ्रविलायं तल्लयं याति मनोजगत् ॥५०

विवर्धमानतापस्य परिणामविनिश्चयात् ।
जनश्चैव कविश्चैव स्थितौ निर्वचसाविव ॥५१

□

---

१. ठेकेदार

३९. प्रावृड्-लहरी

१

समायाता इमा वर्षाः श्यामाग्रैः स्वपयोधरैः ।
पाययन्त्यः पयस्तूर्णं प्रजाभ्यो मातृवत्सलाः ॥

जगत्प्रपञ्चसंसक्तमीतिभीतिसमाकुलम् ।
मेघालोकेऽन्यथावृत्ति चित्तमुच्छ्वसितं मनाक्॥

जननी द्यौः सुखासीनमिमं विन्ध्यं शिशुं यथा।
मेघहस्तैश्चुलुकितैः स्नपयत्यत्र मोदितम् ॥

कूजद्भिश्चातकैर्नित्यं मयूरैश्च कुशीलवैः ।
प्रावृट्प्रवेशमालक्ष्य ध्रुवा प्रावेशिकी[1] कृता ॥

आकाशरङ्गपीठस्थैः समागत्य बलाहकैः ।
पूर्वरङ्गप्रसङ्गेऽस्मिन् विहिता परिघट्टना[2] ॥

२

क्वचिद् दृष्टा क्वचिल्लुप्ता सूचितं वस्तु गूहते ।
विद्युन्मालविका नाट्यं छलितं कुरुते नु किम् ?

---

१. नाट्ये पात्रप्रवेशावसरे प्रयुज्यमाना गीतिः ।

२. पूर्वरङ्गाङ्गेषु नाट्यशास्त्रे पठिता । 'तन्त्र्यौजःकरणार्थं तु भवेच्च परिघट्टना—इति लक्षणात् ।

झलज्झलारव[1] श्चैष निनादयति झल्लरीम् ।
झर्झरो[2] झर्झरीकं[3] स्वं कम्पयन्निव ताण्डवे ॥

सृष्टेरस्मिन् महानाट्ये पर्जन्यस्तु बलाहकम् ।
मृदङ्गमिव सन्ताड्य गम्भीरं गुञ्जयन् स्थितः ॥

वंशिकामिव वंशेषु पलाशेष्वथ वल्लकीम् ।
कस्तीरावृत[4] नीध्रेषु वादयन्त्यथ झल्लरीम् ॥

रुद्रवीणामिवाश्वत्थे शततन्त्रीं महाह्रदे ।
कुतपं[5] कुरुते प्रावृट् पूगस्थूलैः पृषन्तिभिः ॥

३

पणवस्य च शङ्खस्य घोषा आनकदुन्दुभेः ।
कोणाघातेन गर्जद्भिः क्रियन्तेऽद्य बलाहकैः ॥

पवनं जवनं चाश्वमारुह्यैष महाबलः ।
पर्जन्यः पृथिवीलोके विजिगीषुरिव द्रुतः ॥

जययात्रासमारम्भे सीकरस्पर्शनर्तिताः ।
लाजाञ्जलीन् प्रयच्छन्ति पुष्पब्याजेन वल्लयः ॥

विद्युल्लेखाकशाघातैर्बाणैरासारवर्षिभिः ।
प्रकुट्टितो निदाघोऽयं कम्पते भययन्त्रितः ॥

तापयन् सततं लोकान् दुःशासनमिवाहितः ।
घर्मोऽधर्मवशान्नूनं सङ्कुचन् विलयं गतः ॥

४

आकाशपात्रं पर्जन्यो विपर्यस्तमुखं व्यधात् ।
प्लाविता जगती तेन प्रलयाब्धौ निमज्जति ॥

---

१. आसारपतनशब्दः
२. झर्झरः शिवः
३. झर्झरीकं शरीरम्
४. Tin-shed इत्याङ्ग्लभाषायाम्
५. कुतपः गायक-वादकादिसमूहः लक्षणया तत्कर्म

स्फूर्जथुर्जृम्भते तूर्णं पृथ्वी थरथरायते ।
मघोनो वज्रनिर्घोषैर्विद्योतित इरम्मदे ॥

तारस्वरेण तरसा तडित् तडतडायिता ।
दीर्यमाणा च घोषेण प्रचस्खालेव मेदिनी ॥

क्वचिद् गेहे सुखं सुप्तः स्वप्ने शुभ्रं स्मितं सृजन् ।
प्रकम्पितो हतस्वप्नश्चक्रन्दासौ स्तनन्धयः ॥

रुदन्तं तं समागत्य चुचुत्कारैरसान्त्वयत् ।
जननी तस्य सस्नेहं पुनरस्वापयच्च सा ॥

५

आह्वयत्युच्चरावेण धरित्रीं विरहाकुलः ।
वृषायमाण आकाश नर्दति स्पन्दते मुहुः ॥

शनैरवतरन्नेति मेघसोपानपङ्क्तिभिः ।
उच्छिलीन्ध्रे धरादेहे रोमाञ्चैरञ्चिते नभः ॥

वन्ध्या शोषितसर्वस्वा वार्धक्यं गमिता इव ।
खिलीकृता निदाघेन याऽबलेव धराऽखिला ॥

कायाकल्पमिवावाप्य श्यामा नववधूरिव ।
जाता पर्जन्यसंस्पृष्टा सरसा सा रसा रसैः ॥

आयाते प्रियपर्जन्ये कुसुमैः समलङ्कृता ।
नीलशाद्वलशाट्या च धरा वासकसज्जिका ॥

६

जलौघमग्नभूगोल - समुद्धारप्रयोजनात् ।
आलम्बयति पर्जन्यो धारारज्जूः समन्ततः ।

प्रलयाब्धि-विद्युप्ताया भूमेरन्वेषणाय सः ।
सूचीभेद्ये तमःस्तोमे धत्ते विद्युत्प्रदीपिकाम् ॥

मेघमेदुरसम्भेदपङ्क्तिश्यानमसीकृतैः ।
भूतलं जातमाकाशमाकाशं भूतलायितम् ॥

प्रत्युद्गच्छति पर्जन्यमियमुल्लसतीव भूः ।
समुच्छलज्जलौघैस्तैरतिप्रहर्षविह्वला ॥

निरस्तरोदसीदेशं धराकाशौ समीपगौ ।
प्रावृण्मायामहाजालनिबद्धौ मिलितौ दृढम् ॥

७

अवतीर्णा इमा वर्षाश्छत्तीसगढजङ्गले ।
सहतेऽविरतं धारा-सम्पातं वृक्षसन्ततिः ॥

रुन्धन्त्येते द्रुमास्तूष्णीं पूगस्थूलास्तु विप्रुषः ।
जनता सहते मूकं प्रहारानिव दुष्कृतान् ॥

वर्षाधारास्तथा बद्धा वागुरायां महावने ।
यथा भागीरथी वेगात् सङ्कुला शिवमस्तके ॥

क्षणमेव स्थिता मूर्ध्नि स्कन्धे प्रस्खलिता मुहुः ।
शाखासु स्यन्दमानाश्च पल्लवैरवरोधिताः ॥

शनैः शनैर्गता नीचैर्महावृक्षस्य मूलकम् ।
धरामिह निषिञ्चन्ति वर्षाप्रथमबिन्दवः ॥

८

रोमाञ्चितोऽभवद् विन्ध्य उद्गच्छत्पल्लवैर्द्रुमैः ।
कुर्वन् किलकिलारावं शाखामृगनिनादितम् ॥

छत्तीसगढभूम्यां च धान्यमारोप्यतेऽनिशम् ।
कलत्रैर्यत्र वा तत्र व्यस्तहस्तैर्निरन्तरम् ॥

अवाङ्मुखैः श्रमात् खिन्नैस्तथोत्तानीकृतत्रिकैः ।
जलौघमग्नकेदारे दारैर्वा पुरुषैः क्वचित् ॥

कलमानामिमा राज्य उत्खातप्रतिरोपिताः ।
निर्वाचने जनैः सद्यः शासनेऽधिकृता यथा ॥

बुभुक्षितस्य लोकस्य पोषणाय वसुन्धरा ।
विशालं पात्रमादाय धान्यपूर्णमुपस्थिता ॥

९

मनोरथा दरिद्राणां निदाघोत्थानपतिताः ।
धारासार-निपातेन समं तेऽपि समुत्थिताः ॥

छपच्छपत् प्रकुर्वन्त इमे धावन्ति बालकाः ।
नूनं कुतकुतं तेन धरादेहे प्रजायते ॥

आग्रीष्मप्रखरे काले स्नाता ये न कदाप्यहो ।
खेलया स्नपयत्येतान् प्रावृण्नग्नान् हि डिम्भकान् ॥

गर्ताम्भस्यददुर्डिम्भा नौकां कार्गलनिर्मिताम् ।
प्रजातन्त्रोदधौ मुग्धैर्जनैर्दत्तं मतं यथा ॥

सीकरः सुखदश्चैष श्रमिकस्य तनौ पतन् ।
पुष्पासारैर्नभोगङ्गाजलार्द्रैः स्नपयत्यमुम् ॥

१०

सद्यःसीरसत्मुकृष्टा सुरभिं भूरिशश्च भूः ।
लावण्यामृतसम्पृक्ता ललनेव विमुञ्चति ॥

कृष्टपच्या धरा सैषा फालकुद्दाललाङ्गलैः ।
रेखाङ्किताऽञ्चिता भाति भक्तिच्छेदैर्विभूषिता ॥

रोमाञ्चकण्टकैर्जुष्टा तुष्टा वन्या वसुन्धरा ।
लब्ध्वा पर्जन्यसंस्पर्शं समुच्छ्वसिति कोरकैः ॥

छिद्यमानवना नित्यं लुप्यमानतनुस्तथा ।
वृष्ट्या सृष्ट्या च कृष्ट्या च धरित्री किल जीवति ॥

उत्सारिते तथोच्छिन्ने पुनः कामं प्ररोहतः ।
वृक्षराजिर्वने सैषा जनस्यैषा जिजीविषा ।।

पूरोत्पीडेषु सरसां परीवाहा विनिर्गताः ।
अन्यायक्षुब्धमनसां मन्युनोदितभर्त्सनाः ।।

पटं मेघस्य संहृत्य रविः समयमीक्षते ।
कर्षंकस्योन्नतिकरं सामन्तस्य कृतेऽन्तकम् ।।

□

४०. जनतालहरी

पायाद् वः श्रमिकस्य भालनिचितं धर्माम्भसां जालकं
प्रोञ्छन्तीव रसात् प्रसारितकरा कारुण्यनिष्यन्दिनी ।
क्षेत्रे कार्यरतांश्च पामरजनानाह्लादयन्ती शुभा
छाया साऽऽतपदुस्सहेऽत्र दिवसे कृष्णाम्बुदस्यायता ॥१

केचिद् भक्तिपरायणा भवभयादर्चन्ति देवान् स्तवैः
केचिच्चाटुरताः खलांश्चलधियो नेतॄन् प्रभञ्जं छ्रीमतः ।
अस्माकं तु निसर्गतः स्थितिलयाविर्भावहेतुः परं
योगक्षेमविधायिनीह जनता राष्ट्रस्य सा स्तूयते ॥ २

नो न्याये रमतेऽक्षपादचरिते मे शेमुषी, सर्वतो-
भावाछ्लिष्यति नो कणादिकथितं वैशेषिकं दर्शनम् ।
मीमांसामपि कर्मकांडजटिलां मीमांसते नो तथा
निर्वाणं किमु मर्षयेद्घतगुणं, शून्यस्य दूरे कथा ॥ ३

शास्त्रस्याध्ययनं वृथाऽधिकतरं धर्मस्य चर्चा वृथा
वैफल्यं तु गता कथापि सकला पौराणिकी शाश्वती ।
नो ध्याता जनता जनस्य हृदये नारायणः संस्थितो
नो ज्ञातो, यदि नो कृतोऽस्ति जनतोद्बोधाय यत्नो न वा ॥४

नो दानैर्न तपोभिरप्यतितरां नो चेज्यया विद्यया
नो काषायपटैरखण्डविभवैः स्यात् संस्कृतो मानवः ।
हित्वा स्वार्थपरायणैकधिषणां धृत्वा च सेवाव्रतं
लोकाराधननिष्ठयैव पुरुषः संस्कार्यते धार्यते ।। ५

वेदान्तेषु यमाहुरेकपुरुष तत्प्राप्तिलाभेन किं
ब्रह्मानन्दरसेऽपि किं ह्यधिगते संसारविच्छेदजे ।
वैषम्याहिनखीनिमङ्कुलमिमं चालोक्य लोकं मनो
नो कारुण्यसमाकुलं यदि न वा जातं व्यथान्दोलितम् ।। ६

एकं सद् बहुधा वदन्ति यदिदं विप्राः परं पारगं
यच्चैतन्यमखण्डमेकमखिलं ब्रह्माण्डभाण्डे स्थितम् ।
तन्नानात्वविभक्तमप्रतिहतं संज्ञैरसंख्यैः शिवै
रूपैः रूपितसर्वनाम्नि जनताचिद्धाम्नि लीलायते ।। ७

या सङ्घर्षरता विमर्शसहितं या मर्षयन्ती स्थिता
प्रत्युप्तान् हृदि वेदनाव्रणकरान् बाणान् विषैः सम्प्लुतान् ।
नित्यं हालहलं निपीय जनता या नीलकण्ठायते
वन्द्या साऽद्भुतसङ्गरैकनिपुणा संसारभूमौ दृढा ।। ८

या विश्रम्य पुनः श्रमे श्रमजलक्लिन्नापि संसज्जते
श्वासाध्मातशरीरनिस्सहतया दीना मुहुर्मूर्च्छति ।
यातायातसहस्रकोटिगमितैर्यान्ती च नो याप्यते
या सङ्कल्पविकल्पसंशयशतैः रुग्णापि सुस्थायते ।। ९

नानावेषविशारदापि नियतं चैकेव या शारदा
भाषाभिर्व्यवहारमेति बहुधा भिन्नाप्यभिन्नायते ।
यस्यां संश्रितमेतदभ्रनिचित विश्व कुटुम्बायते
या ब्रह्माण्डवटस्थनीडनिलये स्थित्वा शकुन्तायते ।। १०

कश्चित् स्तौति विशेषणैर्बहुपदैः राष्ट्रं जनं राष्ट्रजं
यो दिङ्नाग इवावलेपयति च स्थूलं स्वहस्तं तथा ।
सर्वत्र प्रथते प्रभावगुरुभिः सम्पर्ककर्मान्यवै-
र्वागाडम्बरविभ्रमैकनिपुणो जातः कवी राष्ट्रियः ।। ११

नाहं स्तौमि वयामि नैव मसृणं चीनांशुकं स्वैः पदैः
शब्दैर्नो रचयामि कृत्रिमसुमैश्चित्रां विचित्रां स्रजम् ।
एषा सा सहजं विभावितगुणा मे मानसे संस्थिता
व्यक्तिं स्वस्य करोति चैव जनता वाग्भिर्ममैषा ध्रुवम् ॥ १२

एकोऽहं खलु चास्मि बुद्बुदनिभो यस्मिन् जनिं प्राप्तवान्
निस्सीमे गहनेऽप्रमेयजनतापाथोनिधौ भङ्गुरः ।
शीर्ये वा स्फुटितो भवेयमिह वा लीये ततोऽत्रैव च
स्थास्येऽत्रैव तथापि यस्य कुहरेऽनन्तस्य वारांनिधेः ॥१३

छाया मामनुधावतीह सततं ध्वान्ते प्रकाशेऽथवा
या जागर्ति विजृम्भते मम सदा स्वप्नेषु सुप्तेषु वा ।
रम्ये दृष्टिमुपागते प्रकुरुते पर्युत्सुकं या मनो
गीते काव्यविधौ निरन्तरमितो या स्पन्दते स्यन्दते ॥ १४

छायायां निमिषत्यजस्रतरला यस्यां स्मृतीनां यतिः
यस्यां ता गमिताः कला विगलिता काष्ठा मुहूर्तास्तथा ।
यस्यां नूतननूतनः प्रतिपलं मृत्वा पुनर्जीवितः
सीमानः स्वकृता विघाट्य विपुलाभोगा मयोद्घाटिताः ॥१५

आलोके निपतत्यतन्द्रतरुणे लोकप्रभाभास्वरे
सा च्छाया मयि जायते विवृणते चारुह्य रूपायते ।
यस्यां सङ्गतिमाप्य रूपबहुला रम्याः समुल्लासिता
स्वप्नास्ते जनताधृता धृतबला भावाः समूहोद्भवाः ॥ १६

एकाकी विचरामि यामि जनता सङ्घट्टसङ्घेऽथवा
स्वैकान्ते ह्यथवा भवाम्युत पुनः कान्तासहायो मुदा ।
सर्वत्रैव समाजदत्तविभवैर्भावैरभावेष्वपि
जीवाम्येष तथैव जीवनरस सङ्ग्रह्य सत्त्वं तथा ॥ १७

यत्काव्यं कवयामि भावितरसं शब्दार्थविच्छित्तिजं
यद्गीतं स्फुटमांसलं लययुतं गायामि लीलान्वितम् ।
यत् स्फूर्तं विदुषां सभासु विपुलं व्याख्यानसम्भाषणं
तत् सर्वं जनताजनार्दनमहादेवस्य सङ्कल्पजम् ॥ १८

औदात्त्यं श्रमलग्नभग्नविभवेष्वेव श्रितं सर्वथा
धैर्यं तद्धि यदन्नवस्त्ररहितैर्निस्साधनैर्धार्यते ।
निम्ने यो नवसाम्ययोगनिरतः सम्प्राप्य वर्गे जनिं
धीरोदात्त इति प्रथां हि नियतं नव्ये युगे सोऽर्हति ॥१९

क्षेत्रे स्वे श्रमबिन्दुचित्रिततनुर्यो वै तपस्तप्यते
तं निर्वास्य दुराग्रहात् स्ववसतेराच्छिद्य भूमिं ततः ।
आक्रम्यातिमदादगण्यमिव तं मत्वा जनं निर्भया
विक्रामन्ति च साट्टहासमधुना चञ्चा मनुष्या सुखम् ॥२०

पाञ्चाल्या इव कृष्यते हतधिया दुःशासनेनानिशं
यस्या वस्त्रमपीह चैव वदनाद् ग्रासस्तथाऽऽच्छिद्यते ।
आमूलं छलिताऽशुभैर्नृपशुभिः कौटिल्यनीत्या च या
सैवेयं जनता हता विदलिता कष्टां दशां प्रापिता ॥२१

वसनं परिधूसरं वसाना नितरां क्षाममुखी हृतस्वरूपा ।
अतिनिष्करुणेन केन नीता जनतैषा कठिनां दशां विषण्णा ॥२२

को जानीते हृदयं को वैतस्याः कथां व्यथां शृणोति ।
कुररीवत् कान्तारे जनता करुणं कथं विरौति ? ॥ २३

सेयमवगुण्ठनवती निर्दलिताखिलशरीरलावण्या ।
अत्याचारैः खिन्ना पतिगृहगमिता वधूरिवास्ति ॥ २४

गच्छति पुरतो देशः पुनरिह पश्चात् प्रधृष्यते जनता ।
कोऽयं समाजवादः प्रगतिर्वा कीदृशी सेयम् ॥ २५

एकत्राभ्रविचुम्बिभिः प्रसृमरैः सौधैः समुत्सार्यते
दुर्नीतिप्रचितैः परत्र विधमद्दावाग्निभिर्दह्यते ।
अन्यत्र प्रतिगामिभूमिपतिभिः कुद्दालकैष्छिद्यते
दूर्वेव प्रतिरोहतीह जनता विन्ध्याद्रिभूमौ तता ॥२६

वत्सत्वेऽतिबुभुक्षितां स्वजननीं दूरस्थितामीक्षते
याऽऽपीनं विनिपीड्य दोहनपरैर्दोदुह्यते यौवने ।
वार्धक्ये बहुखेदिता च वधिकैः सूनागृहं नीयते
सैषा गौरिव भारतीयजनता व्याहन्यते निर्दयम् ॥ २७

गृष्टिर्ग्लायति सीदति स्तनभरैर्वत्साय चोत्कायते
गोधेनुः प्रविताड्यते गतघृणं हम्बारवोद्गारिणी ।
दीना यातु च कुत्र लुप्तविभवा शुष्कस्तनी गोवशा
सा गोबष्कयणी व्रणीकृततनुर्गेहात् समुत्सार्यते ॥२८

एके धूसरधर्मकञ्चुकवृता आच्छन्नकूपोपमा
अन्ये शास्त्रमुदाहरन्ति च सतीदाहप्रचाराय ये ।
येऽमी मानुषराक्षसाः स्वयमहो नारीं दहन्त्यत्र वा
नैतेषां परमार्थतोऽपि भवति स्वल्पं किमप्यन्तरम् ॥२९

दग्धासीत् खलु दक्षयज्ञदहनज्वालासु पूर्वं सती
दाहं नैव समर्थयन् ज्वलितदृक् क्रुद्धो यथा धूर्जटिः ।
अन्यायं प्रतिकर्तुमेव भगवान् दक्षक्रतुं नाशय-
न्नुग्रं ताण्डवमाचरन्नजनयच्छ्रीवीरभद्रं गणम् ॥३०

ये केचित् खलु धारयन्ति वितथां धर्मस्य कन्थां वृथा
मिथ्याचारपरायणा च बहुधा प्राहुर्वचो पुष्पितम् ।
सर्वांस्तान् कुपथाश्रितान् हतधियो दुर्दाम्भिकान् छासितुं
दुर्वृत्तस्य विनाशनाय जनता कुर्यात् तथा ताण्डवम् ॥३१

आदायाहितसारमाहितरसं सन्ताड्य मुष्ट्या मुहुः
संसारस्य शिलातलेऽतिगुरुके चोत्तोल्य सम्पातयन् ।
जीर्णं वस्त्रमिवातिनिर्दयतया निष्पीड्य विस्तारितं
कालो धावकवद् दरिद्रमनुजं मृद्नाति सङ्क्षालयन् ॥३२

ग्रीष्मेऽङ्खारखरैस्तपन्निह करैर्मित्रोऽप्यमित्रायते
वर्षन् भग्नकुटीरजर्जरवृतौ देवस्तु दैत्यायते ।
क्षुत्क्षामस्य विषायते मधुरहो नो माधवस्त्रायते
सामन्तैर्बहुखेदितस्य निखिलं विश्वं विरुद्धायते ॥३३

अन्योन्यं क्षपयन्ति दोषदर्शनधिया निघ्नन्ति राष्ट्रं जनं
नेतारश्च परस्परं प्रतिगताः पक्षं विपक्षं श्रिताः ।
व्यूहं वा रचयन्ति द्वन्द्वनिरता राज्यश्रियः काम्यया
ते स्वं घ्नान्ति परं नयन्ति निधनं सुन्दोपसुन्दौ यथा ॥३४

आत्मानं तु निषेवते स जनतासेवाव्रतं धारय-
न्नुच्चैः प्राप्य पदं च पश्यति जनं न्यक्कारगर्भं भृशम् ।
शुभ्रः खद्दरवस्त्रमण्डिततनुस्तृष्णां तु नो मुञ्चति
काषायं न जहाति चेतसि धृतं काषायकन्थो यथा ॥३५

नेताऽसौ नवयौवनो नवमदो नव्योदयो नव्यधी-
र्यो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
उच्चैःकारमपि ब्रवीति बहुलं सन्त्यक्तलज्जो जडः
कालस्यैष गतिं न वेत्ति महतीं रीतिं च संस्कारिताम् ॥३६

संस्कारैः रहिता प्रशासनरता मत्तास्तु ते पूरुषा
आनर्थक्यमहो प्रयान्ति विकलाः शब्दा यथाऽसंस्कृताः ।
आशेव प्रहताऽपवादकलुषा कीर्तिः, कृशा श्रीर्यथा
राष्ट्रे स्वे जनताऽवमानविधुताऽधीतिर्यथा सीदति ॥३७

एकश्चूषति लोकशोणितमहो दुर्दाम्भिको धार्मिको
धर्माडम्बरदिग्भ्रमैकनिपुणश्चान्यः पटुर्मौलवी ।
एतौ द्वावपि वञ्चनाहितमती धिक्कारपात्रं, परं
शोच्या तावनुगच्छतो जडधियो गड्डारिकावज्जनाः ॥३८

ग्राहं ग्राहमियं कचेषु मुषिता मेषस्य मातेव या
क्रव्यादभिः प्रविलुप्यमानवदनाद् गौर्गौरिति व्याहृता ।
साहं साहमतीव दुःखनिचयं चाविर्भवत् तेजसा
कालं प्राप्य करोति सैव जनता शार्दूलविक्रीडितम् ॥३९

विन्ध्याद्रिं समतीत्य दक्षिणभुवं कुम्भयोनिर्मुनि-
र्यातस्तं प्रतिपालयन्निह गिरिर्नम्रो नतः संस्थितः ।
दिल्लीं यात इतश्च स प्रतिनिधिर्निर्वाचितो यो जनै-
र्ग्रामे जानपदाः प्रतीक्षणपरास्तिष्ठन्ति धैर्यान्विताः ॥४०

उत्सिक्ता विनयाच्च्युता नृपशवो भाग्यैश्चलैर्विस्मिताः
क्रूराचारपरायणाश्च धरणीं नेतृव्रुवाः शासति ।
नीचैस्तैर्न धृता धरा च नितरां नीचैरियं नीयते
तामेतां तु समुद्धरेद्धि जनता स्वेनैव सत्त्वेन सा ॥४१

आयातेऽवसरेऽनुशासति च या दुःशासनान् दारुणान्
शक्तिः सा जनतागताऽतिमहतीदानीं तथाऽविर्भवेत् ।
साम्यालोचनलोचनेन निखिलैर्लोकैरिदं लोकितं
स्वाराज्यं च जनेषु दत्तविभवं तद् भारते भ्राजताम् ॥४२

सक्ता खादतमोदतासु नितरां हर्म्येषु भव्येषु ये
स्वादुङ्कारमपीह षड्रसमयं भोज्यं तथा भुञ्जते ।
आयाहीत इतश्च याहि वद रे मौनं भजेथा अरे
चेत्येवं खलु ये निरन्तरमिह क्रीडन्ति प्राणैर्नृणाम् ॥४३

ऐश्वर्येऽपि तमोरतास्तृणलवप्राया समस्ता इमे
मन्यन्ते च तृणाय ये स्मयजुषः साधारणं मानवम् ।
वात्येवातिदुरन्तवेगभरिता सङ्घात् समुत्पादिता
नाशं नेष्यति तान् लघूनिव लवान् शक्तिर्जनानां द्रुतम् ॥४४

ये भूमिं निखनन्ति खर्वपरुषां कुद्दालमुत्तोल्य, ये
साम्बाकृत्य कृषन्ति शस्यजननीं, कर्षन्ति ये वा हलम् ।
ये स्कन्धेषु च रोपयन्ति विपुलं फालं तथा लाङ्गलं
धाराभिः परशोरुदग्रपरुषाश्छिन्दन्ति काष्ठानि ये ॥४५

ये लौहं द्रवयन्ति यन्त्रनिवहैः सीव्यन्ति वस्त्राणि ये
दर्वीर्वा त्वरितं नुदन्ति विपुलाभोगे कटाहे च ये ।
उन्मातुं पृथिवीं दिशो विमथितुं संस्प्रष्टुमाहो नभः
सन्त्येते किणचिह्निता व्रणयुतास्ते ते करा उत्थिताः ॥४६

वृष्ट्यापूरजलौघमग्नपुलिने वृन्दावने यामुने
कृष्णः कालियमर्दनोऽप्यभयदो गोवर्धनं धारयन् ।
इन्द्रस्याप्यतिगर्ववबंरहृदो मानं च सञ्चूर्णयन्
गोपालैः सहितो हितः स्वजनता जीवातुभूतोऽभवत् ॥४७

तद्वत् कालियकर्मघोरनिपुणान् दुर्वारदुःखप्रदान्
दुर्नेतॄन् जनतापि मर्दयतु तान् देशान्वये संहता ।
एकच्छत्रमिव प्रसारितमयं राष्ट्रस्य गोवर्धनो
लोकालोक इवाचलो वितनुतामालोकमाराच्छुभम् ॥४८

आद्यावापृथिवि स्थितां करतलैः सन्ताडनीयामिमां
सम्भूयैव भिनत्ति रश्मिनिवहो भानोस्तमिस्रातताम् ।
छिन्द्यादुद्यदुदग्रदुष्कृतिमयं तद्वज्जनानां गणो
ध्वान्तं लोकपथावतीर्णमखिलं नेत्रोत्सवालोकितः ॥४९

होतारो वयमृत्विजस्तु जनताशक्तेर्महासङ्गमः
सुप्रातः सुदिवाः सुसन्धिसमयः सुश्वो जनो जायताम् ।
यज्ञेऽस्मिन् प्रविभज्यतां प्रतिजनं निर्वाचने शासनं
ह्यालोकः प्रसरीसरीतु सुभगश्चा लोकतन्त्राध्वनः ॥५०

□

४

गीतवल्लरी

४१. प्रश्नगीतिः

सरति मानसे चिन्तासरणिर्नाणुतया वशमयते ।
प्रश्नकीलिता सततं शङ्का ह्यतिशयमनुशयमिव कुरुते ।।

विचलति वेल्लति भवति च मनः सहसा किमु सोत्कम् ।
रेखामात्रमपि क्षुण्णं नो जायते किमर्थं मे ।।

अङ्गारैराचितमपि सहसा महसैव नैव ज्वलति ।
आर्द्रेन्धनमिव चेतो धूमायते किमर्थं मे ? ।।

काव्यव्यक्ता स्वरलहरी गुञ्जति सततमनाहतापि ।
निःस्पन्दा न तु मानसतन्त्री झङ्कार्यते किमर्थं मे ।।

त्रुटिते प्रेमाबन्धे प्रक्षालित इव मनसो रागे ।
मयि दृष्टिं निदधच्चक्षुर्वाष्पायते किमर्थं ते ? ।।

□

४२. ईश्वरकाव्यविलासः

निबद्धभावसन्ततिप्रगाढबन्धबन्धुरम्
प्रमोदमद्यमेदुरं समं विषादसादितम्
अनादिवासनान्वितं रसैस्ततं सुसंस्कृतं
विचित्रवृत्तचित्रितं मितं हितेन सम्मितम्,
तदीश्वरस्य काव्यविश्वमद्भुतं महीयते ।

विलोक्य यन्निरूपितं ह्यपाङ्गकैः पिपास्यते
निशम्य चानिशं तु शं दिवानिशं न लभ्यते,
न जोषमास्यते परं, न तोषमाप्यते क्षणम्
तथापि यच्च गीयते स्वमानसे निधीयते
विषेण मूर्च्छिता सुधा त्वनारतं निपीयते
तदीश्वरस्य काव्यवर्त्म दारदोऽमृतायते ।

द्रुमैः सुमैः प्रफुल्लिता क्वचित् प्रमोदवाटिका
नितम्बिनीह नीयते छविल्लकेन नायिका ।
क्वचित् कुविन्दहट्टके जिजीविषा पणीकृता
क्वचिच्छ्मशानघट्टके सतीचिता प्रदीपिता
तदीय भस्मरञ्जिता भवेन स्वा तनुः कृता,
तदीश्वरस्य काव्यवस्तु भूतिभिर्विशिष्यते ।

□

४३. ध्रुवागीतयः

[१]

राष्ट्रस्य भूमिर्महती विशाला
जायते मृत्योरिव पानशाला ।

एता नराणां बत मुण्डमालाः
कीर्णाः कस्माद् दिशि दिशि विकरालाः ?
आर्तत्राणाय विधृतैः कृपाणैः
निर्दोषाणां किं पणितं प्राणैः ।

उन्मादिनी कथं पीता हाला ।

परितः सृताः शोणितमद्यकुल्याः
छायाश्चरन्त्यथवा प्रेततुल्याः ।
अव्यग्रं मनुजो जग्धि क्रव्यं
हतयज्ञेऽर्पितं नराणां हव्यम् ॥

मृत्युर्लूतेयं सारितजाला ।

[२]

कालयामिनीयं क्षपिता भविता
उदयिता पथि प्रेरयिता सविता ।
इति कल्पयते जनता भीतियुता
तस्कर-लुण्ठाकैर्बहुशो दलिता ॥

कालयामिनीयं क्षपिता भविता ।

[३]

तस्करास्ते प्रभवन्ति यथायथा
जायते जनजीवनमयथातथा ।
अनुदिनं तु वर्धते जनताव्यथा
सूर्योदयस्य सा दूरेऽस्ति कथा
चलितव्यं तमसा ग्लपितेन पथा

इयं हि चिरन्तनी प्रथा ॥

[४]

तमसस्तु ततिर्भुवनं व्याप्नोति
तस्करवृत्तिरहो राष्ट्रं दुनोति ।
जनतैषा धारयते विश्वासं
सूर्योदयस्य कुरुते ह्यभिलाषम् ॥

□

४४. लोरी-गीतम्

भद्रे निद्रे धीरे तीरे त्वमवतर मानससरसि नः ।
शोकविमुद्रे मीलय नयनयुगलदलमलं जनस्य ॥

अवतर भगवति निद्रे सुखं मया त्वत्कृते च समास्तृतः ।
नवशाद्वलसुकुमारः स्रस्तर इव नयनपुटः स्वस्य ॥

उच्छ्वासैर्निःश्वासैर्वयेन्द्रजालैरहो दुकूलं तत् ।
कूलं यन्नयते नः मन्दं मन्दं सुखजलधेश्च ॥

दुःखविमोक्षे स्वीके शरणे स्वीकुरु च मामपि सकरुणे ।
अरुणे त्वुदिते कामं व्यपनय नयनगतमञ्चलं च ॥

चञ्चलमस्ति मदीयं निध्यायत् त्वामिदं दृगञ्चलम् ।
उद्घाटितौ गवाक्षावक्षिपुटौ मे प्रविश स्वैरम् ॥

गृहकार्ये या जाले नितरां बद्धा न वेत्ति विश्रममपि ।
क्षणमयि तामपि गृहिणीमाश्वासय नय च निजलोके ।

क्षुधा चार्दिते बाले बाले काले दयस्व चास्मिंस्त्वम् ।
स्थापय कामं वरदं भालतले स्वं करतलमस्य ॥

नयनं न याति चयनं स्वप्नस्य चाप्ययनं विलीनं तत् ।
नवपल्लवसुकुमारे गृह्णासि जनं न चेत् स्वाङ्के ॥

दीने हीने दुःखाकुलिते श्रमेण च निस्सहगात्रेऽत्र ।
दयसे त्वमेव शुभ्रे श्रमिकेऽपि कर्षकजने वापि ॥

रणरणकाकुलितेऽस्मिन् कृपां कृपामयि निधेहि संसारे ।
स्नेहसुधासारे स्वे सारय नयने सुखाधारे ॥

□

४५. प्रेमगीतम्

भ्रान्त्वा क्लान्तः खिन्नमनाः सम्प्राप्तः
सायं पुनरिह स्वं निकेतनम्
दृष्ट्वा त्वया सखेदं दयिते
दीयते खेदस्य वेतनम् ।

इयमन्यतमा विलासलुलिता दृष्टिर्
मुहुरुज्जीवयतेतराम्
कार्यालय-हर-कोपानल-भस्मसात् कृतम्
अङ्गेष्वनुङ्गमहो मकरकेतनम् ।

अनुदिनमनुक्षणमनुसंसारम्
मुहुरिह सरणं मुहुरिह मरणम्,
आसङ्गतेराविप्रयोगतायास्ते
मुहुरुच्छ्वसितं मुहुरपि जीवितम् ।

क्रान्त्वा द्वारं पुनरपि मृत्यो-
रायातः स्वकुलायवेश्मकम् ।
जीवनरसमयि, यत्रासीना
कुरुषे स्नेहनिवेशनम् ॥

भ्रान्त्वा क्लान्तः खिन्नमनाः सम्प्राप्तः
सायं पुनरिह स्वं निकेतनम् ।
दृष्ट्वा त्वया सखेदं दयिते
दीयते खेदस्य वेतनम् ॥

□

४६. विक्रयगीतम्

विक्रीयते किं किं न भुवने ?

क्रीतं सर्वं भोः करपादं
नेत्रं श्रोत्रं सादं सादम् ।
श्रमिको बन्धीकृत्य क्रीतो
राजंस्ते निष्कृपे शासने ।।

विद्या क्रीता क्रीतं ज्ञानम्
एतदेव किं ते विज्ञानम् ?
क्रेतुं कथं पारयसि राजन्
मनोऽस्मदीयं विहिते पणने ?

गीतं क्रीतं शब्दाः क्रीता
मधुमयभणितिर्हट्टं नीता ।
नादब्रह्म विक्रीतं चैव
विदुषां सदसि, कविसम्मेलने ।।

हट्टे हट्टे बत सङ्घट्टः
को वा नष्टः कोपि प्रणष्टः ।
विक्रेतार इमे ह्युपस्थिताः
दृष्टिं दत्त्वा क्रेतुर्वदने ।।

स्वात्मच्छाया क्रीता दृष्टा
चितिरपि मनुजे भीता दृष्टा ।
प्रतिबिम्बो नो स्वस्य वेद्यते
भवता प्रदत्तेऽस्मिन् दर्पणे ॥

विविधं विततं सर्वं क्रय्यम्
किं वा क्रेयं किं वा हेयम् ।
याहि याहि रे नैव कदाचिद्
विक्रीयते निखिलं जीवने ॥

विक्रीयते सर्वं न भुवने ।

□

५

नमोवाक्

४७. कन्याकुमारीकाव्यम्

क्रान्त्वा विन्ध्यं पुरवनततिं व्योमयानेन तूर्णं
वेलां प्राप्तः सहजकुतुकात् पश्चिमस्याब्धेः ।
पृच्छामि त्वां कुशलमिह तल्लोचनाभ्यामदृष्टां
ज्ञातुं सोत्कोऽपि खलु कठिनं वर्धते ते तपस्तत् ॥

अन्विष्यामि प्रतिदिनमिह त्वां कुमारीं प्रपन्नो
गन्ता वाऽऽहो कियदयि पथि प्राप्तये तेऽस्मि कन्ये ।
मन्ये मातर्मम विकलतां विस्मिताभ्यामुरुभ्यां
पश्यन्ती त्वं स्मयस इह सा वत्सला लोचनाभ्याम् ॥

हट्टे प्रान्ते नगरपरिधौ नीयते मे शरीरं
चित्तं चैतद् विचलति मुहुर्द्रष्टुमुत्कं कुमारीम् ।
प्रत्युप्ता त्वं किमसि सिकतासङ्गतायां धरित्र्यां
किं वा ऽकस्मान्नयनपुरतो यास्यसीह प्ररोहम् ?॥

दूराद् दृष्टा किमति सहसा ढौकसे[1] स्वीयमास्यं
लीना वासि प्रबललहरीतालतुङ्गेऽब्धिभङ्गे ।
यद्वा गुप्ता क्वचन कुहरे सागरस्य प्रचण्डे
खण्डे वास्मिन् हिमगिरिसुते तप्यमाना तपांसि ॥

---

१. ढौक आच्छादने ।

धृत्वा हस्ते निभृतनिभृतं पादुके चैष पद्भ्यां
वेलायां यत् प्रबलजलधेरित्वरोऽहं चरामि ।
देवि क्षेत्रे तव विचरतः केरलानां सुरम्ये
क्षन्तव्योऽहं यदि मम पदा कच्चिदामृश्यसे त्वम् ॥

शान्ते क्षेत्रे सवननियमं वा चरन्ती शिलायाः
पृष्ठे भागे भवसि जनतामेलकेनात्र खिन्ना ।
पश्यामि त्वां क्षितिजपुलिने दूरमस्याः शिलायाः
खेलन्तीं वोच्छलितगतिभिस्तैः पयोधेस्तरङ्गैः ॥

सिन्धोरस्य प्रकटितमिदं यज्जलं कज्जलाभं
श्यामं रूपं छुरितमिह ते गाहनादेव वा किम् ?
आपःशाटीलहरिपटलीं स्वे कराग्रे च धृत्वा
सोत्तिष्ठन्ती जलनिचयतो दृश्यसे तेन गौरी ॥

शुभ्रैः फेनैर्हससि लहरीघातजातैः शिलायां
दोर्भ्यां दोर्भ्यां तरसि सहसा वीचिमालासु चाब्धेः ।
एदद् दृश्यं क्वचिदित इतः सैकते तेऽङ्घ्रियुग्मं
हन्ताखण्डं क्वचिदपि न ते गौरि रूपं समीक्षे ॥

नाहं बालः प्रकृतिसरलस्त्वं च नैवासि माता
योत्सङ्गे मां रभसनिभृतं धारयेः स्नेहजुष्टा ।
प्रौढिं प्राप्तः पलितशिरसा त्वां कुमारीं नतोऽहं
मातृस्नेहस्त्वदुरसि सदा तेन मां स्वीकुरुष्व ॥

यत्र स्थित्वा विहितविधिभिर्दीर्घकालं तपोभिः
सिन्धुर्बन्धुस्तरुवरगणः पुत्रकल्पः कृतस्ते ।
काले तस्मिंस्तव हि तपसां साक्षिभूतास्तरङ्गा
अद्याप्येते कथयितुमहो उद्गतास्तत्कथां किम् ? ॥

क्षिप्त्वा घोरं निशितपरशुं केरलानुद्ददार
रेखां कुर्वन् जलधिपरिधौ भार्गवस्त्वत्र रामः ।
स्वीये क्रोडे विततलहरीभङ्गसङ्गे तपस्ते
दृष्ट्वा नूनं स्वयमिह ददौ स्थानमेतत् पयोधिः ॥

अद्याप्येषा समयसुदढा बन्धुरा सा शिला ते
स्नेहात् तुभ्यं स्वयमुपहृता बन्धुना सिन्धुना या।
तत्र व्यक्तं दृषदि चरणन्यास आस्ते तवायं
शश्वद् भक्तैरुपहृतबलिर्भ्राजमानः पवित्रः ॥

यस्यामेव प्रथितमतुलं नूतनं स्मारकं तै—
र्नव्यैर्भक्तै रचितमधुना च्छादयित्वा समुद्रम्।
अन्तर्धानं गतमिव तव स्थानमेतेन दिव्यं
त्वं तद् याता क्वचन सहसा डम्बरेणेव खिन्ना ॥

त्रातुं चैतत् प्रकृतिसुभगं पश्चिमक्षेत्र रूपं[1]
वेलारूढैर्हरितसिचयां पादपैर्वन्य लक्ष्मीम्।
गुप्तापि त्वं सृजसि बहुलाः सैनिकानां चमूस्ता
विश्वामित्रप्रतिहितरुषा कोपना नन्दिनीव ॥

अङ्गारो वा भवति स यथा नष्टदीप्तिर्गतायु-
र्भस्मच्छन्नो झटिति पवनप्रेरणाज्वाल्यमानः।
निर्वाणं मे गतमिव तथा प्रातिभं ज्योतिरासीत्
त्वं चायाता नवलकलया तद्धि सन्धुक्षयन्ती ॥

काव्यं कामं भवतु न पुनर्यद्धि सम्बोधनं मे
त्वां प्रत्येतत् किमपि लपितं जल्पितं स्वैरमेव।
मूकीभूता भवसि यदि वा भाषसे नोत्तरं वा
प्रत्यादेशं मयि तव कृतं नाहमेतं तु मन्ये ॥

आपृच्छे त्वां गमनसमयः प्राप्त एषोऽधुना मे
किं वा भूयः सहजविशदं दर्शनं तेऽहमाप्स्ये।
धन्ये मान्ये यदि पुनरहो मन्यसे दर्शनार्हं
कन्ये मां त्वं भवति च वयो मामकं तेन धन्यम् ॥

---

१. पश्चिमघट्टरक्षान्दोलनं साम्प्रतिकमत्र सङ्केतितम्।

श्रीश्रीकण्ठसमद्युतिं विदधतीं वारांनिधेरञ्चलं
श्यामां तां बहुनारिकेलकदलीवृक्षच्छटां तन्वतीम् ।
रम्यां रम्यतटीकटीमनु सदा रक्ताम्बरं सैकतं
बिभ्राणां, हरितप्रभाप्रमुदितां कन्यां कुमारीं भजे ॥

□

४८. भरत-भावना

भरतो भारतवर्षं भुवि प्रतिष्ठां निनाय कृत्स्नायाम् ।
तेने नाट्यवितानं तेनेहाभिनयसन्तानम् ॥

प्रतिभा निरता यस्य प्रति भारतवासिनोऽनुरञ्जनाय ।
विश्रामाय श्रमार्त-शोकार्त-तपस्विनो नरस्य ॥

येनायोजि नयेनाखिलमपि नाट्यं नवैः रसपदार्थैः ।
आसंसारं सारं सारं क्षपितं न यत्सारम् ॥

नैकान्ततोऽस्ति यस्मिन्ननुभावनं नरस्य देवस्यापि ।
नैकान्ते यन्नयते मनुजं रमयति परं कान्ते ॥

अध्वर्युं नवयज्ञे पूर्वमपूर्वं च येन जनितमत्र ।
तमहं वन्दे भरतं प्रजापतिं नाट्यविश्वस्य ॥

□

४८. कविस्मृतिः

यक्षो मनो मदीयं कविता त्वलकापुरी त्वदीया सा ।
मध्ये च वर्तमानो विलम्बते कालमेघो ऽयम् ॥१

रामगिरौ संसारे जीर्णारण्ये मुहुर्मुहुः प्लुष्टः ।
दवदहनज्वालाभिश्चिन्तासन्ततिभिरहमनिशम् ॥२

तव स्मृतिः सहसा सा सीकरसन्ततिरिवावतरन्तीह ।
प्रशमनफलं विधत्ते चापन्नार्ते मदीयमनसि ॥३

स्मरति मनो मे यावत् तव नवसंस्कारपूतभारत्याः ।
तावन्नैव विधत्ते रतिमिह पापे न वा तापे ॥४

एकान्ते ध्वान्ते मे विधुरा सीदति मनोदशा नितराम् ।
दीपशिखेव ज्वलिता स्फाटिकयोगेन ते वाण्याः ॥५

आपूरितकेदारे जीवति युक्तस्तु शुष्ककेदारः ।
जीवितुमिह वाञ्छामि त्वयि युक्तस्तथा चाहमपि ॥६

अभिनवसुन्दरतायाः सहचर, सह चर मया स्वललितपदैः ।
वसन्ते ऽनन्ते वान्त-विकासिसुमसुरभितवनान्ते ॥७

अवतर कविवर हालाहलपरिपूरितभवे ऽस्मदीये त्वम् ।
ऊयिकाभिरिव जग्धे ग्रन्थागारे विनष्टचरे ॥८

विचर मया सह विन्ध्ये सुषमावन्ध्ये विखण्डितसत्त्वेऽपि ।
खल्वाटे कान्तारे प्लुष्टप्राये च भूखण्डे ॥९

घुणलग्ने सुविशाले काष्ठागारे तथैव समायाहि ।
धीवर-विहितं प्रश्नं समुपस्थापय पुनः सुकवे ॥१०

वरमिमस्ममभ्यं त्वं कविवर देहि यजनेऽपि सृष्टेर्न
धूमाकुलदृष्टीनां पावक एवाहुतिः पततु ॥११

□

५०. कालिदासवन्दना

भावावेशाद् रसिकहृदये या पदं न्यस्य मुग्धा
मन्दाक्रान्ता ह्यभिनवमधूवन्मनोहारिणी सा ।
यत्काव्याभा सहृदयदलं मोहयत्येव सद्यो
वन्दे त वै सरसरचनं कालिदासं कवीशम् ।।

प्रत्यादेशाद् विधुरहृदयां भर्त्सितां तां मुनिभ्यां
नारीं दीप्तां तदपि न रुषं नैव मानं त्यजन्तीम् ।
तामेतां यः प्रतिसहृदयं मूर्तयामास चित्ते
वन्दे ऽ हं तं ललितवचनं कालिदासं कवीशम् ।।

एकान्ते यः स्मरति सततं स्वीयकान्तागुणानां
शून्ये ऽ रण्ये करुणकरुणा लीयते यस्य वाणी ।
गुह्यां ज्ञातुं प्रभवति कविर्गुह्यकस्यास्य पीडां
वन्दे ऽ हं तं तरलहृदयं कालिदासं कवीशम् ।

अभ्युत्थानं व्यसनमखिलं मानवीनां प्रजानां
दृष्टं येन प्रकटितमिदं दर्शनाद् वर्णनाच्च ।
राजन्तं तं ह्युपरि परितः काव्यविश्वे समस्ते
वन्दे नित्यं कविकुलगुरुं कालिदासं कवीशम् ।।

□

५१. राघवभट्टवन्दना

दुर्व्याख्यामर्मप्रहरणभीषितखेदितकवितायाः
वनिताया व्रणरूषितगात्रे बध्नन्तं मृदु पट्टम्,
कालिदासकाव्याम्बुधिमवगाहं गाहं रत्नानां
राशीभूतानामर्थानां रचयन्तं नवहट्टम्,

अर्थद्योतनिकासौन्दर्योन्मीलितवाङ्मयरूपैः
विविधशास्त्रविद्याशिल्पानां कलयत्तं सङ्घट्टम्,
द्रष्टारं सुकविकुलगुरो रसमयभणितेर्विच्छित्तीनां
लाघवबोधितभावतति तं वन्दे राघवभट्टम् ।

□

५२. सफ्दरहाशमीः

छाया यस्य सदा बभूव शरणं सन्तप्तलोकाय सा
साम्ये यासुदृढं स्थिता सुनिश्चितपथं सन्दर्शयन्ती शिवम् ।
या नाट्यं प्रतिबद्धमप्यरचयन्माङ्गल्यभावान्वितं
यस्यां श्रीश्च सरस्वती च पुरुषव्यापारवश्ये स्थिते ॥

दुर्दान्तैर्नितरां मदस्मयजुषैर्धृत्वा कुठारान् खरान्
सत्तालोलुपवृत्तिभिर्वृकसमैः कातर्यनीतिं श्रितैः ।
छिन्नस्तैः स महाशमीतरुरहो सान्तर्ज्वलत्पावकः
श्रीमान् सफ्दरहाशमी विजयते मृत्वाप्यसौ नो मृतः ॥

निघ्नन्ति स्म कदर्थितास्तु कुटवः वीरं यथा छद्मना
चक्रव्यूहनिबद्धमर्जुनसुतं चैकाकिनं सङ्गताः ।
हिंस्रैः स्वार्थपरायणैः कुचरितैरेकः स वीरो हतः
कर्तव्यं न जहौ क्षणे क्षणमहो यो वै तथा चान्तिमे ॥

नष्टे वस्तुनि तस्य चात्र नितरां छायापि सा नश्यति
छायात्मा विननाश किन्तु न मनाङ् निश्चप्रचं हाशमेः ।
दारास्तस्य वहन्त्यमी ध्वजममुं यत् तेन चोन्नामितं
माला नाम तदीयकीर्तिमणिकामालेव सञ्चारिणी ॥

□

५३. उमा माहेश्वरी

सम्पूर्णं पुण्यानां वितरन्ती या फलं बहुलमनघम् ।
अवतीर्णेयमभिनवा सरस्वती भारतवर्षभुवि ।।

कालिदासकविताया संसारं जीवितं विधत्ते या ।
शकुन्तलालावण्यं कण्वौदात्त्यं भरतबाल्यम् ।।

या गौरीव कुमारी तपश्चर्यया परं पवित्रं तत् ।
चरितं चरितार्थत्वं नयति विनयगुणैः सम्पन्ना ।।

उमया माहेश्वर्या प्रत्यक्षमुमामहेश्वरौ गमितौ ।
सम्यक् कृता सपर्या वागङ्गससत्त्वनेपथ्यैः ।।

□